क्नूय् (Set) 1 A. शब्दे-उन्दे च । to make a creaking sonnd; to be wet; to sink. Act. क्नूयते, अक्नूयत, चुक्नूये, चुक्नूयिध्वे-ढ्वे, क्नूयिताहे, क्नूयिष्यते, अक्नूयिष्ट, क्नूयिषीय, Pass. क्नूय्यते, क्नूयिष्यते, अक्नूयि, Caus. क्नोपयति-ते, अचुक्नूपत्—त Desid. चुक्नूयिषते, Deri. क्नूत, क्नूयितुं, क्नूयित्वा, क्नूयमान, क्नूयिष्यमाण, चुक्नूयान.

क्मर् (Set) 1 P. हूर्च्छने । to be crooked.

क्रथ् (Set) 1 P. हिंसायाम् । to injure, hurt or kill. Act. क्रथति, चक्राथ, क्रथितास्मि, क्रथिष्यति, अक्रथीत् or अक्राथीत्, क्रथ्यासं. Pass. क्रथ्यते. क्राथिष्यते, अक्राथि or अक्राथि, Caus. क्रथयति-ते अचीक्रथत-त, Desid. चिक्रथिषति, Deri. क्रथित, क्रथितुं, क्रथित्वा.

क्रद् (Set) 1 A. वैक्लव्ये, वैकल्येच । to be confounded, to grieve.

क्रंद् (क्रदि-Set) 1 A. वैकलव्ये-वैकल्येच to lament; to grieve; Act. क्रंदते, अक्रंदत, चक्रंदे, क्रंदिताहे, क्रंदिष्यते, अक्रंदिष्ट, क्रंदिषीय Pass. क्रंद्यते, क्रंदिष्यते, अक्रंदि, Caus. क्रंदयति-ते, अचक्रंदत-त, Desid. चिक्रंदिषते, Deri. क्रंदित, क्रंदितुं, क्रंदित्वा, क्रंदमान, क्रंदिष्यमाण, चक्रंदान.

क्रंद् (क्रदि-Set) 1 P. आव्हाने रोदनेच to call out; to cry. Act. क्रंदति, चक्रंद, क्रंदितास्मि, क्रंदिष्यति, अक्रंदिष्यत्, अक्रंदीत्, क्रंद्यासं. Desid. चिक्रंदिषति, Deri. क्रंदत्, चक्रंद्वस् .

क्रप् (क्रपू-Set) I A. कृपायांगतौच । to pity; to go; Act· क्रपते, चक्रपे, क्रपिताहे, क्रपिष्यते, अक्रपिष्ट, क्रपिषीय, Pass. क्रप्यते, क्रपिष्यते, अक्रपि, Caus. क्रपयति-ते, अचक्रपत्-त Desid चिक्रपिषते, Deri. क्रपित, क्रपितुं, क्रपित्वा.

क्रम् (क्रमु-Set) but Anit when Atmanepadi) 1 P. पाद विक्षेपे, to walk; to step; to go, to cross; to leap; to ascend. Act. क्रामति, क्रमते. अक्रामत्, अक्रमत. चक्राम, चक्रमे, चक्रमिथ, चक्रमिषे, क्रमितास्मि, क्रंताहे. क्रमिष्यति, क्रंस्यते. अक्रमीत्, अक्रंस्त, अक्रमिष्ट, अक्रंध्वं, अक्रमिषं, अक्रंसि. क्रम्यासं, क्रंसीय. Pass. क्रम्यते, क्रंस्यते, अक्रमि, Caus. क्रमयति—ते (with सम्, उत्, &c. संक्रामयति-ते, उत्क्रामयति ते.) अचिक्रमत्—त, Desid. चिक्रमिषति, चिक्रंसते, Deri. क्रांत, क्रमितुं, क्रमित्वा, or क्रांत्वा or क्रंत्वा, संक्रम्य, क्रामत् , क्रममाण, क्रमिष्यत, क्रंस्यमान, चक्रण्वस् , चक्रमाण.

क्रीड् (क्रीडृ-Set) 1 P. विहारे । to amuse oneself; to play; to gamble. (with आ, अनु or परि, Atmanepadi; with सम् A. when it means ‘to play’ and P. when meaning “to make a noise or to creak or break”) Act. क्रीडति—ते, अक्रीडत्-त,

चिक्रीड—डे, चिक्रीडिथ-षे, क्रीडितास्मि—हे, क्रीडिष्यति—ते, अक्रीडीत्-अक्रीडिष्ट· क्रीड्यासं—क्रीडिषीय, Pass. क्रीड्यते, क्रीडिष्यते, अक्रीडि Caus. क्रीडयति-ते, अचिक्रीडत्—त Desid. चिक्रीडिषति-ते, Deri. क्रीडित, क्रीडितुं, क्रीडित्वा, क्रीडत्, क्रीडमान, चिक्रीड्वस्, चिक्रीडान.

क्रुंच् (Set) 1 P. कौटिल्याल्पी भावयोः। to make crooked; to bend or curve; to lessen; Act. क्रुंचति, चुक्रुंच, क्रुंचितास्मि, क्रुंचिष्यति, अक्रुंचीत्, क्रुंच्यासं, Pass. क्रुंच्यते, क्रुंचिष्यते, अक्रुंचि Caus क्रुंचयति—ते, अचुक्रुंचत्-त, Desid. चक्रुंचिषति, Deri. क्रुंचित, क्रुंचितुं, क्रुंचित्वा.

क्रुश् (Anit) । P. आव्हाने रोदनेच। to call out; to cry. Act. क्रोशति, चुक्रोश, चुक्रोशिथ, क्रोष्टास्मि, क्रोक्ष्यति, अक्रोक्ष्यत्, अक्रुक्षत्, क्रुश्यासं, Pass. क्रुश्यते, क्रोक्ष्यते, अक्रोशि, Caus. क्रोशयति—ते, अचुक्रुशत्-त, Desid. चुक्रुक्षति, Deri. क्रुष्ट, क्रुष्ट्वा, क्रोशत्, क्रोक्ष्यत्, चुक्रुश्वस्.

क्लथ् (Set) 1 P. हिंसायाम्। to hurt or kill. Act. क्लथति, चक्लाथ, क्लथितास्मि, क्लथिष्यति, अक्लथीत्, अक्लाथीत्, अचिक्लथत्—त, क्लथ्यासम्, Pass. क्लथ्यते, क्लथिष्यते, अक्लथि, Caus. क्लथयति-ते, अचक्लथत्—त, Desid. चिक्लथिषति, Deri. क्लथित, क्लथितुं, क्लथित्वा.

क्रुंद् (क्रुदि—Set) 1 P. आव्हाने-रोदनेच। to call out; to cry.

क्लुंद् (क्लुदि-Set) 1 A. वैक्लव्ये—वैकल्येच। to be confounded, to lament; forms are similar to क्रुंद्, क्ल being substituted for क्र.

क्लम् (Set) 1 P. ग्लानौ। to be fatigued. Act. क्लामति, अक्लामत्, चक्लाम, चक्लमिथ, क्लमितास्मि, क्लमिष्यति, अक्लमिष्यत्, अक्लमत्, क्लम्यासं, Pass. क्लम्यते, क्लमिष्यते, अक्लामि, अक्लमिषि, Caus. क्लमयति, अचिक्लमत्, Desid. चिक्लमिषति, Deri. क्लांत, क्लमितुं, क्लमित्वा or क्लांत्वा, क्लामत्, क्लमिष्यत्, चक्लन्वस्.

क्लिंद् (क्लिदि-क्लिदि-Set) 1 U. परिदेवने। to lament. Act क्लिंदति-ते, चिक्लिंद—दे, क्लिंदितास्मि—हे, क्लिंदिष्यति—ते, अक्लिंदीत्-अक्लिंदिष्ट, क्लिंद्यासं-क्लिंदिषीय, Pass. क्लिंद्यते, क्लिंदिष्यते, अक्लिंदि,

Caus. क्लिंदयति, अचिक्लिंदत्, Desid. चिक्लिंदिषति-ते, Deri. क्लिंदित, क्लिंदितुं, क्लिंदित्वा, चिक्लिंद्वस्—चिक्लिंदान.

क्लीब् (क्लीबृ—Set) 1 A. अधाष्टर्ये । to behave like a eunuch; to be timorous or modest or unassuming. Act. क्लीबते, चिक्लीबे, क्लीबिताहे, क्लीबिष्यते, अक्लीबिष्ट, क्लीबिषीय, Pass. क्लीब्यते, क्लीबिष्यते, अक्लीबि, Caus. क्लीबयति-ते, अचिक्लीबत्-त, Desid. चिक्लीबिषते, Deri. क्लीबित, क्लीबितुं, क्लीबित्वा.

क्लु (क्लुङ्–Anit) 1 A. गतौ, । to go. क्लवते, चुक्लुवे, क्लोताहे, क्लोष्यते, अक्लोष्ट, क्लोषीय, Pass. क्लूयते, क्लोष्यते or क्लाविष्यते अक्लावि, अक्लोषी or अक्लाविषि, Caus. क्लावयति–ते, अचूक्लवत्-त, Desid. चुक्लुषते, Deri. क्लुत, क्लोतव्य, क्लव्य. क्लोतुं, क्लुत्वा, क्लवमान, क्लोष्यमाण, चुक्लुवान.

क्लेव् (क्लेवृ—Set) 1 A. सेवने । to serve, Act. क्लेवते, चिक्लेवे, क्लेविताहे, क्लेविष्यते. अक्लेविष्ट, क्लेविषीय, Pass. क्लेव्यते, क्लेविष्यते, अक्लेवि, Caus. क्लेवयति—ते, आचिक्लेवत्—त, Desid. चिक्लेविषते. Deri. क्लेवित, क्लेवितुं, क्लेवित्वा.

क्लेश् (क्लेशृ-Set) 1 A. अव्यक्तायां वाचि, बाधने इतिदुर्गः । to speak inarticulately; to impede.

क्वण् (Set) 1 P. अव्यक्तशब्दे । to jingle; to tinkle; to hum; to warble. Act. क्वणति, चक्वाण, चक्वणिथ, क्वणितास्मि. क्वणिष्यति, अक्वणीत् or अक्वाणीत्, क्वण्यासं, Pass. क्वण्यते, क्वणिष्यते, अक्वाणि, अक्वणिषि, Caus. क्वणयति—ते, अचिक्वणत्—त, Desid. चिक्वणिषति, Deri. क्वणित, क्वणितुं, क्वणित्वा, चक्वण्वस्.

क्वथ् (क्वथे—Set) 1 P. निष्पाके । to boil; to decoct; to digest; Aor. अक्वथीत्, Caus. क्वाथयति-ते, Deri. उत्क्वथ्य.

क्षज् (क्षज्—Set) 1 A. वधे । to kill. Act. क्षजते, अक्षजत, क्षजताम्. क्षजेय, चक्षजे, क्षजिताहे, क्षजिष्यते, अक्षजिष्ट, क्षजिषीय, Pass. क्षज्यते, क्षजिष्यते, अक्षजिषि, Caus. क्षजयति-ते, अचिक्षजत्-त, Desid. चिक्षजिषते, Deri. क्षजित. क्षजितुं, क्षजित्वा.

क्षंज् (क्षजि-Set) 1 A. गतिदानयोः । to go. to give. Act. क्षंजते, चक्षंजे, क्षंजिताहे, क्षंजिष्यते, अक्षंजिष्ट, क्षंजिषीय, Pass. क्षंज्यते,

क्षंजिष्यते, अक्षंजि or अक्षांजि, Caus. क्षंजयति—ते, अचक्षंजत्—त. Desid. चिक्षंजिषते, Deri. क्षंजित, क्षंजितुं, क्षंजित्वा.

क्षद् (a sautra root–Set) 1 A. संपेषण रक्षणयोः । to cut, to protect, to eat.

क्षम् (क्षमू–ष् Wet) 1 A. सहने । to forgive; to suffer; to allow; to put up with; to resist; to be able to do anything. Act क्षमते, चक्षमे, चक्षमिषे, or चक्षंसे, चक्षमिध्वे or चक्षंध्वे, चक्षमिवहे or चक्षण्वहे, चक्षमिमहे or चक्षण्महे, क्षमिताहे or क्षंताहे, क्षमिष्यते or क्षंष्यते, अक्षमिष्यत–अक्षंस्यत, अक्षमिष्ट or अक्षंस्त, अक्षमिष्ठाः or अक्षंस्थाः, अक्षमिध्वं or अक्षंध्वं, अक्षमिषि or अक्षंसि, क्षमिषीय or क्षंसीय, Pass. क्षम्यते, क्षमिष्यते or क्षंस्यते, अक्षमि, अक्षमिषि or अक्षंसि. Caus. क्षमयति–ते, अचिक्षमत्–त. Desid. चिक्षमिषते or चिक्षंसते, Deri. क्षांत, क्षमितुं or क्षंतुं. क्षमित्वा or क्षांत्वा, संक्षम्य, क्षममाण, क्षमिष्यमाण or क्षंस्यमान, चक्षमान.

क्षंप् (Set) 1 P. क्षत्याम् । to forgive or endure.

क्षर् (Set) 1 P. क्षरसंचलने । to flow; to ooze; to wane: to become useless, to melt. Act. क्षरति, चक्षार, चक्षरिथ, क्षरितास्मि, क्षरिष्यति, अक्षारीत्, क्षर्यासं, Pass. क्षर्यते, क्षरिष्यते, अक्षारि, Caus. क्षारयति, अचिक्षरत्, Desid. चिक्षरिषति, Deri. क्षरित, क्षरितुं, क्षरित्वा, चक्षर्वस्.

क्षि (Anit) 1 P. क्षये । to decay; to wane, to waste. Act. क्षयति-चिक्षाय, चिक्षयिथ or चिक्षेथ, क्षेतास्मि, क्षेष्यति, अक्षेष्यत्, अक्षैषीत्, अक्षैषुः, क्षीयासं, Pass. क्षीयते, क्षेष्यते or क्षायिष्यते, अक्षायि, अक्षेषत or अक्षायिषत–अक्षेढ्वं or अक्षायिध्वं—ढ्वं, Caus. क्षाययति–ते, अचिक्षयत्–त, Desid. चिक्षीषति. Deri. क्षित or क्षीण, क्षेय (also क्षय्य), क्षेतुं, क्षित्वा, प्रक्षीय, क्षयत्, क्षेष्यत्, चिक्षिवस्.

क्षिद् (Set) 1 P. अव्यक्तेशब्दे । to make an inarticulate sound, Act. क्षेदति, चिक्षेद, क्षेदितास्मि, क्षेदिष्यति, अक्षेदीत्, क्षिद्यासं, Pass. क्षिद्यते, क्षेदिष्यते, अक्षेदि, Caus. क्षेदयति–ते, अचिक्षिदत्–त, Desid. चिक्षेदिषति, Deri. क्षिदित, क्षेदितुं, क्षिदित्वा.

क्षिव् (क्षिवु–Set) 1 P. निरसने । to eject from the mouth; to vomit; to spit out. Bene. क्षीव्यासं. Pass. क्षीव्यते, Desid. चिक्षेविषति or चुक्ष्यूषति, Deri. क्ष्यूत, क्षेवित्वा or क्ष्यूत्वा, प्रक्षीव्य, चिक्षिवस् .

क्षीज्(Set) 1 P. अव्यक्तेशब्दे । to speak inarticulately. Act. क्षीजति, चिक्षीज, क्षीजितास्मि, क्षीजिष्यति, अक्षीजीत्, क्षीज्यासं, Pass. क्षीज्यते, क्षीजिष्यते, अक्षीजि, Caus. क्षीजयति-ते, आचिक्षीजत्-त. Desid. चिक्षीजिषति. Deri. क्षीजित. क्षीजितुं, क्षीजित्वा.

क्षीब् (क्षीबृ—Set) 1 A. मदे । to be drunk or intoxicated, Act. क्षीबते, चिक्षीबे, क्षीबिताहे, क्षीबिष्यते, अक्षीबिष्ट. क्षीबिषीय. Pass. क्षीब्यते, क्षीबिष्यते, अक्षीबि. Caus. क्षीबयति-ते, अचिक्षीबत्-त. Desid. चिक्षीबिषते. Deri. क्षीब, प्रक्षीबित, क्षीबितुं, क्षीबित्वा, चिक्षीबान.

क्षीव् (क्षीवृ-Set) 1 A. मदे । to be drunk or intoxicated.

क्षीव् (क्षीवु—Set) 1 P. निस्सने । to spit out.

क्षुद् (छान्दसः-Set) 1 P. गतौ । to go. Act. क्षोदति, चुक्षोद, क्षोदितास्मि, क्षोदिष्यति, अक्षोदीत्, क्षुद्यासं. Pass. क्षुद्यते, क्षोदिष्यते, अक्षोदि. Caus. क्षोदयति-ते, अचुक्षुदत्-त. Desid. चुक्षुदिषति. Deri. क्षुदित, क्षोदितुं, क्षोदित्वा.

क्षुप् (a Sautra root-Set) 1 P. मदे । to be intoxicated.

क्षुभ् (क्षुभ—Set) 1 A. संचलने । to be agitated; to disturb. Act. क्षोभते, चुक्षुभे, क्षोभिताहे, क्षोभिष्यते, अक्षोभिष्यत—अक्षोभत् or अक्षोभिष्ट, क्षोभिषीय, Desid. चुक्षुभिषते or चुक्षोभिषते. Deri. क्षुब्ध, क्षुभित्वा or क्षोभित्वा, प्रक्षुभ्य, क्षोभमान, चुक्षुभान.

क्षुंप् (छान्दस :—Set) 1 P. गतौ । to go; Act. क्षुंपति. चुक्षुंप. क्षुंपितास्मि. क्षुंपिष्यति. अक्षुंपीत्. क्षुंप्यासं. Pass. क्षुंप्यते. क्षुंपिष्यते. अक्षुंपि. Caus. क्षुंपयति-क्षुंपयते. Desid. चुक्षुंपिषति. Deri. क्षुंपित. क्षुंपितुं. क्षुंपित्वा.

क्षेव् (क्षेवु—Set) 1 P. निरसने । to spit out. Act. क्षेवति. चिक्षेव. क्षेवितास्मि. क्षेविष्यति. अक्षेवीत्. क्षेव्यासं. Pass. क्षेव्यते. क्षेविष्यते. अक्षेवि. Caus. क्षेवयति—ते. Desid. चिक्षेविषति. Deri. क्षेवित. क्षेवितुं. क्षेवित्वा or क्षेव्त्वा.

क्षै- (Anit) 1 P. क्षये । to wane, to decline; to decay, to waste away. Act. क्षायति. चक्षौ. चक्षिथ or चक्षाथ. क्षातास्मि. क्षास्यति.

अक्षास्यत्. अक्षासीत्. क्षायासं or क्षेयासं. Pass. क्षायते. क्षास्यते or क्षायिष्यते, अक्षायि, अक्षासि, अक्षायिषि, Caus. क्षपयति-ते, अचिक्षपत्-त Desid. चिक्षासति, Deri. क्षाम, क्षेय, क्षातुं, क्षात्वा, चक्षिवस्.

क्ष्माय् (क्ष्मायी-Set) 1 A. विधूनने । to tremble; to shake. Act. क्ष्मायते, चक्ष्माये, चक्ष्मायिध्वे-ढ्वे, क्ष्मायिताहे, क्ष्मायिष्यते, अक्ष्मायिष्ट, अक्ष्मायिषि, क्ष्मायिषीय. Pass. क्ष्माय्यते, क्ष्मायिष्यते, अक्ष्मायि. Caus. क्ष्मापयति-ते, अचिक्ष्मपत्-त. Desid. चिक्ष्मायिषते, Deri. क्ष्मात, क्ष्मायितुं, क्ष्मायित्वा, क्ष्मायमान, चक्ष्मायान.

क्ष्मील् (Set) 1 P. निमेषणे । to wink, Act. क्ष्मीलति, चिक्ष्मील, क्ष्मीलितास्मि, क्ष्मीलिष्यति, अक्ष्मीलीत्, क्ष्मील्यासं. Pass. क्ष्मील्यते, क्ष्मीलिष्यते, अक्ष्मीलि. Caus. क्ष्मीलयति-ते. Desid. चिक्ष्मीलिषति. Deri. क्ष्मीलित, क्ष्मीलितुं, क्ष्मीलित्वा.

क्ष्विड् (ञिक्ष्विडा-Set) 1 A. स्नेहनमोचनयोः । to be wet or unctuous; to discharge juice; to emit sap. Aor. क्ष्वेडते, चिक्ष्विडे, क्ष्वेडिताहे, क्ष्वेडिष्यते, अक्ष्वेडिष्ट or अक्ष्विडत्, क्ष्वेडिषीय. Pass. क्ष्विड्यते. क्ष्वेडिष्यते. अक्ष्वेडि. Caus. क्ष्वेडयति-ते. अचिक्ष्विडत्-त. Desid. चिक्ष्विडिषते or चिक्ष्वेडिषते, Deri. क्ष्वेडित, क्ष्विडित्वा or क्ष्वेडित्वा. क्ष्वेडितुं, चिक्ष्विडान.

क्ष्विद् (ञिक्ष्विदा-Set) 1 A. स्नेहनमोचनयोः । to be wet, &c. Deri. क्ष्विण्ण or क्ष्वेदित. क्ष्वेदितव्य. क्ष्वेदितुं. क्ष्विदित्वा or क्ष्वेदित्वा. क्ष्वेदमान. चिक्ष्विदान.

क्ष्वेल् (क्ष्वेलृ-Set) 1 P. चलने । to leap; to move; to shake; Act. क्ष्वेलति. चिक्ष्वेल. क्ष्वेलितास्मि. क्ष्वेलिष्यति. अक्ष्वेलीत्. क्ष्वेल्यासं, Pass. क्ष्वेल्यते. क्ष्वेलिष्यते. अक्ष्वेलि. Caus. क्ष्वेलयति—ते. अचिक्ष्वेलत्—त. Desid. चिक्ष्वेलिषति. Deri. क्ष्वेलित. क्ष्वेलितुं. क्ष्वेलित्वा.

खक्ख् (Set) 1 P. हसने । to laugh at.

खज् (Set) 1 P, मन्थे । to churn; to agitate. Aor. अखजीत् or अखाजीत्.

खंज् (खजि—Set) 1 P. गतिवैकल्ये । to limp. Act. खंजति, चखंज, खंजितास्मि, खंजिष्यति, अखंजीत, खंज्यासं. Pass. खंज्यते, खंजिष्यते अखंजि. Caus. खंजयति-ते. अचखंजत्—त. Desid. चिखंजिषति. Deri. खंजित, खंजितुं, खंजित्वा, चखंज्वस्.

खट (Set) 1 P. कांक्षायां । to desire.

खंड् (खडि Set) 1 A. भेदने । to break, to cut, to tear to pieces. Act. खंडते, चखंडे, खंडिताहे, खंडिष्यते, अखंडिष्ट, खंडिषीय.

खद् (Set) 1 P. स्थैर्ये हिंसायांच । to be firm, to kill.

खन् (खनुं—Set) 1 U. अवदारणे । to dig up; Act; खनति–ते, चखान–चख्ने, चखनिथ, चख्निषे. खनितास्मि—हे, खनिष्यति—ते. अखनिष्यत्–त, अखनीत् or अखानीत्, अखनिष्ट. खायासं or खन्यासं, खनिषीय. Pass. खन्यते or खायते, खनिष्यते, अखानि, Caus. खानयति-ते. अचीखनत्–त. Desid. चिखनिषति–ते. Deri. खात, खेय, खनितुं, खात्वा or खनित्वा, उत्खाय or उत्खन्य, चखन्वस् or चख्नान.

खब् }
खंब् } (Set) 1 P. गतौ । to go.

खर्ज् (Set) 1 P. व्यथने पूजनेच । to pain; to worship.

खर्द् (Set) 1 P. दंदशूके । to bite, to sting.

खर्ब् (Set) 1 P. गतौ । to go.

खर्व् (Set) 1 P. दर्पे । to be proud or haughty.

खल् (Set) 1 P. संचये चलनेच । to gather or collect; to move or shake. Aor. अखालीत्.

खष् (Set) 1 P. हिंसायाम् to injure, hurt or kill.

खाद् (खादृ–Set) 1 P. भक्षणे । to eat; to devour. Act. खादति, चखाद, चखादिथ खादितास्मि, खादिष्यति, अखादीत्. खाद्यासं. Pass. खाद्यते, खादिष्यते, अखादि, Caus. खादयति, अचखादत्. Desid. चिखादिषति. Deri. खादित, खादितुं, खादित्वा, खादत्, चखाद्वस्.

खिट् (Set) 1 P. त्रासे । to fear, to frighten. Act. खेटति, चिखेट, खेटितास्मि, खेटिष्यति, अखेटीत्, खिट्यासं. Pass. खिट्यते. खेटिष्यते, अखेटि. Caus. खेटयति—ते. अचीखिटत्—त. Desid. चिखेटिषति or चिखिटिषति Deri. खेटित, खेटितुं, खेटित्वा.

खु (खुङ्–Set) 1 A. शब्दे । to sound. Act. खवते. चुखुवे. खोताहे. खोष्यते, अखोष्ट, खोषीय.

खुज् (खुजु-Set) 1 P. स्तेयकरणे । to rob; to steal. Act. खोजति चुखोज, खोजितास्मि, खोजिष्यति, अखोजीत्, खुज्यासं. Pass. खुज्यते खोजिष्यते, अखोजि. Caus. खोजयति-ते. अचूखुजत्-त. Desid. चुखुजिषति Deri. खुग्न, खोजित्वा, खुक्त्वा, खोजितुं.

खुड् (खुडि-Set) 1 A. खंजे । to limp; to break into pieces. खुंडते, चुखुंडे, खुंडिताहे, खुंडिष्यते, अखुंडिष्ट. खुंडिषीय.

खुर्द् (Set) 1 A. to play Act. खुर्दते etc.

खूर्द् (Set) 1 A. क्रीडायाम् । to play. Act. खूर्दते, चुखूर्दे, खूर्दिताहे, खूर्दिष्यते, अखूर्दिष्ट. खूर्दिषीय.

खेल् (खेलृ-Set) 1 P. चलने । to shake; to tremble; to play. Act. खेलति, चिखेल, खेलितास्मि, खेलिष्यति, अखेलिष्यत, अखेलीत्. खेल्यासं. Pass. खेल्यते, खेलिष्यते. अखेलि, Caus खेलयति, अचिखेलत्. Desi. चिखेलिषति. Deri. खेलित खेलितुं. खेलित्वा, चिखेल्वस्.

खेव् (खेवृ-Set) 1 A. सेवने । to serve. Aor. अचिखेवत्—त.

खै (Anit) 1 P. खदने । to strike: to be firm; Act. खायति, चखौ, चखिथ, चखाथ, खातास्मि, खास्यति, अखासीत्, खायासं, Pass. खायते, खास्यते or खायिष्यते, अखायि. Caus. खापयति-ते. अचीखपत्—त, Desid. चिखासति, Deri. खात, खातुं, खात्वा, खायत्, खास्यत, चखिवस्.

खोट् खोटृ
खोड् खोडृ
खोर् खोरृ —(Set) 1 P. गति प्रतिघाते । to limp, to be lame.
खोल् खोलृ

गज् (Set) 1 P. शब्देमदेच । to sound or roar; to be drunk or confused. Act. गजति, जगाज, गजितास्मि, गजिष्यति, अगजीत् or अगाजीत्, गज्यासं. Pass. गज्यते, गजिष्यते, अगाजि Caus. गाजयति-ते, अजीगजत्-त. Desid. जिगजिषति. Deri. गजित गजितुं, गजित्वा, गजत्, जगज्वस्.

गंज् (गजि-Set) 1 P. शब्दे । to sound, Perf. जगंज, Aor. अगंजीत्.

गड् (Set) 1 P. सेचने । to distil; Aor. अगडीत्, Caus. गडयति-ते, अजीगडत्-त. Pass. गड्यते. Aor अगडि, अगाडि.

गंड् (गडि—Set) 1 P. वदनैकदेशे । to affect the cheek.

गद् (Set) 1 P. व्यक्तायांवाचि । to speak, to say.

गंद् (गदि–Set) 1 P. वदनैकदेशे । to affect the cheek.

गम् (गम्लृ–Set) 1 P. with सम् A. गतौ । to go. Act. गच्छति. (संगच्छते), जगाम (संजग्मे), जगमिथ or जगंथ (संजग्मिषे), गंतास्मि (संगताहे), गमिष्यति (संगंस्यते), अगमिष्यत् (समगंस्यत), अगमत् (समगत or समगंस्त), अगमन् (समगसत or समगसत), अगमः (समगथाः or समगंस्थाः), अगमत (समगध्वं or समगंध्वं), अगमं (समगसि or समगंसि), गम्यासं (संगंसीय or संगसीय). Pass. गम्यते, गंस्यते, अगामि, अगथाः or अगंस्थाः, अगध्वम्, or अगंध्वं, अगसि or अगंसि. Caus. गमयति–ते. अजीगमत्–त Desid. जिगमिषति (संजिगंसते) Deri. गत, गंतुं, गत्वा, आगम्य or आगत्य, जग्मिवस् or जगन्वस् (संजग्मान).

गर्ज् } Set } 1 P. शब्दे । to roar; to growl; to thunder.
गर्द्

गर्ब् (Set) 1 P. गतौ । to go.

गर्व् (Set) 1 P. दर्पे ! to be proud.

गर्ह् (गर्ह–Set) 1 A. (sometimes P. also) कुत्सायां । to blame; to censure.

गल् (Set) 1 P. अदने स्रावेच । to eat; to drip.

गल्भ् (गल्भ—Set) 1 A. (generally with प्र.) धाष्ट्र्ये । to be bold or confident.

गल्ह् (गल्ह–Set) 1 A. कुत्सायां । to blame, to censure.

गा (गा-ङ्–Anit) 1 A. गतौ, to go. Act. गाते, जगे, गाताहे, गास्यते, अगास्त, गासीय, गायते, गास्यते अगायि, Caus. गापयति-ते, अजीगपत्—त. Deri. गात, गात्वा, गातुं.

गाध् (गाधृ—Set) 1 A. प्रतिष्ठा–लिप्सयोर्ग्रन्थेच । to set out for, to dive, to seek, to compile, to string together, to stay.

गाह् (गाहू–Wet) 1 A. विलोडने । to dive, to bathe; to penetrate, to agitate or churn, to be absorbed in; to hide oneself in;

to destroy, Act. गाहते, जगाहे, जगाहिषे or जघाक्षे, जगाहिध्वे—ढ्वे or जघाढ्वे, जगाहिमहे or जगाह्महे, गाहिताहे or गाढाहे, गाहिष्यते or घाक्ष्यते, अगाहिष्यत or अघाक्ष्यत. अगाहिष्ट or अगाढ. अगाहिषत or अघाक्षत. अगाहिष्ठाः or अगाढाः, अगाहिध्वं-ढ्वं or अघाढ्वं, अगाहिषि or अघाक्षि. गाहिषीय or घाक्षीय. Pass. गाह्यते. गाहिष्यते or घाक्ष्यते. अगाहि, अगाहिषि or अघाक्षि. Caus. गाहयति—ते, अजीगाहत्-त. Desid. जिगाहिषते or जिघाक्षते. Deri. गाढ, गाहितव्य or गाढव्य. गाह्य, गाहितुं, or गाढुं, गाहित्वा or गाढ्वा, जगाहान.

गु (गु-ङ्—Anit) 1 A. अव्यक्तेशब्दे । to speak inarticulately. Act. गवते, जुगुवे, जुगुविषे, गोताहे, गोष्यते, अगोष्ट, गोषीय. Pass. गूयते, गोष्यते or गाविष्यते, अगावि, अगोषि or अगाविषि. Caus. गावयति—ते, अजूगवत्—त. Desi. जुगूषते. Deri. गुत, गोतुं, गुत्वा, गवमान, जुगुवान.

गुज् (Set) 1 P. कूजने । to hum or buzz;

गुंज् (गुजि—Set) 1 P. अव्यक्तेशब्दे । to hum or buzz, to sound inarticulately; Act. गुंजति, जुगुंज, गुंजितास्मि, गुंजिष्यति, अगुंजिष्यत, अगुंजीत्, गुंज्यासं. Pass गुंज्यते. गुंजिष्यते, अगुंजि. Caus. गुंजयति-ते, अजुगुंजत्-त. Desid. जुगुंजिषति Deri. गुंजित, गुंजितुं, गुंजित्वा, जुगुंज्वस्.

गुंठ् (गुठि—Set) 1 P. वेष्टने । to enclose; to envelope;

गुंड् (गुडि-Set) 1 P. वेष्टने-रक्षणे-चूर्णनेच । to envelope, to protect; to pound.

गुड् (गुड—Set । A. क्रीडायाम् । to play.

गुध् (गुध—Set) 1 A. क्रीडायाम् । to play.

गुप् (गुपू—Wet) 1 P. रक्षणे । to protect; to conceal, Act. गोपायति, जुगोप or गोपायांचकार, &c. जुगोपिथ or जुगोप्थ, गोपायितास्मि or गोपितास्मि or गोप्तास्मि. गोपायिष्यति or गोपिष्यति or गोप्स्यति. अगोपायीत् or अगोपीत् or अगौप्सीत्, गोपाय्यासं or गुप्यासं, Pass. गोपाय्यते or गुप्यते, गोपायिष्यते or गोपिष्यते or गोप्स्यते, अगोपायि or अगोपि. Caus. गोपाययति-ते or गोपायति-ते अजुगोपायत्-त or अजूगुपत्-त, Desid. जुगोपायिषति or जुगोपिषति or जुगुपिषति or जुगुप्सति, Deri. गोपायित or गुप्त, गोपायितुं

or गोपितुं or गोप्तुं, गोपायित्वा or गोपित्वा or गुपित्वा or गुप्त्वा, संगोपाय्य or संगुप्य, गोपायत, मोपायिष्यत् or गोपिष्यत् or गोप्स्यत्, जुगुप्वस् or गोपायांचकृवस्.

गुप् (गुप्—Set) 1 A निंदायाम् गोपनेच । to censure; to despise, to hide. Act. जुगुप्सते, जुगुप्सांचक्रे, जुगुप्सिताहे, जुगुप्सिष्यते, अजुगुप्सिष्यत, अजुगुप्सिष्ट, जुगुप्सिषीय, Pass. जुगुप्स्यते, जुगुप्सिष्यते अजुगुप्सि, Caus. जुगुप्सयति—ते, अजूगुप्सत्-त. Desid, जुगुप्सिषते, Deri. जुगुप्सीत, जुगुप्सितुं, जुगुप्सित्वा, जुगुप्समान, जुगुप्सांचक्राण. The following are the regular froms—गोपते, जुगुपे, गोपिताहे गोपिष्यते. अगोपिष्यत, अगोपिष्ट, गोपिषीय, Pass. गुप्यते. गोपिष्यते. अगोपि. Caus. गोपयति-ते. अजूगुपत्-त. Desid. जुगोपिषते or जुगुपिषते, Deri. गुपित or गोपित, गोपितुं, गोपित्वा or गुपित्वा, गोपमान, जुगुपान.

गुर्द्-गूर्द् (गुर्द्-Set) 1 A. क्रीडायाम् । to play, गु-गूर्दते, &c.

गुर्व् (गुर्वी-Set) 1 P. उद्यमने ; to endeavour, to elevate, गूर्वति, P. P. गूर्ण.

गुह् (गुह् Wet) 1 U. संवरणे । to cover; to hide; Act. गूहति-ते. जुगूह—जुगुहे, जुगूहिथ or जुगोढ—जुगुहिषे or जुघुक्षे, गूहितास्मि—हे or गोढास्मि—हे. गूहिष्यति—ते or घोक्ष्यति—ते, अगूहिष्यत्—त or अघोक्ष्यत्—त. अगूहीत् or अघुक्षत्-अगूहिष्ट or अघुक्षत् or अगूढ, गुह्यासं—गूहिषीय or घुक्ष्य, Pass. गुह्यते, गूहिष्यते or घोक्ष्यते. अगूहि Caus. गूहयति—ते अजूगुहत्—त, Desid जुघुक्षति—ते, Deri. गूढ, गुह्य, गूहितव्य or गोढव्य, गूहितुं or गोढुं, गुहित्वा or गूहित्वा or गूढ्वा, उपगुह्य, जुगूह्वस-जुगुहान.

गॄ (Anit) 1 P. सेचने । to sprinkle, to wet, Act. गरति, जगार. गर्तास्मि, गरिष्यति, अगार्षीत. ग्रीयासं. Pass. ग्रीयते, गरिष्यते or गारिष्यते, अगारि. Caus. गारयति—ते, अजीगरत्—त. Desid. जिगार्षति- Deri. गृत, गर्तुं, गृत्वा, जगृवस्.

गृज् { Set } 1 P. शब्दे । to sound, to roar, to grumble.
गृंज् { गृजि }

गृह् (गृहू-Wet) 1. A ग्रहणे । to take; to seize; Act. गर्हते, जगृहे, जगृहिषे, or जघृक्षे, गर्हिताहे or गर्ढाहे, गर्हिष्यते or घर्क्ष्यते, अगर्हिष्यत, अघर्क्ष्यत, अगर्हिष्ट or अघृक्षत, गर्हिषीय or घृक्षीय. Pass. गृह्यते, गर्हिष्यते or घर्क्ष्यते, अगर्हि Caus. गर्हयति-ते, अजीगृहत्-त or अजगर्हत्-त. Desid. जिगर्हिषते or जिघृक्षते. Deri. गृढ, गर्हितव्य or गर्ढव्य, गर्हितुं or गर्ढुं, गर्हित्वा or गृढ्वा, जगृहाण.

गेप् (गेपृ Set) 1 A. कंपने । to shake; Caus. गेपयाति-ते. Aor. अजिगेपत्-त.

गेव् (गेवृ-Set) 1 A. सेवने । to serve, Caus. Aor. अजिगेवत्-त.

गेष् (गेषृ-Set) 1 A. अन्विच्छायाम् । to search; to investigate, Caus. Aor. अजिगेषत्-त.

गै (Anit) 1 P. शब्दे । to sing, to relate. Bene. गेयासं Pass. गीयते. Deri. गीत, गीत्वा.

गोष्ट् (गोष्ट-Set) 1 P. संघाते । to assemble; to collect; to heap together.

ग्रंथ् (ग्रथि-Set) 1 A. कौटिल्ये । to be crooked or wicked, to bend.

ग्रंथ् (Set) 1 P. बंधने-संदर्भेच । to bind, to arrange in a regular order.

ग्रस् ग्लस् { ग्रसु ग्लसु Set } 1 A. अदने । to eat; to devour, to swallow; to consume; to seize; to eclipse; to destroy. Caus. ग्रासयति, अजिग्रसत्. Deri. ग्रस्त, ग्रसितुं, ग्रसित्वा or ग्रस्त्वा, जग्रसान.

ग्रुच् ग्लुच् { ग्रुचु ग्लुचु Set } 1 P. स्तेयकरणे । to steal. Aor. अग्रुचत् or अग्रोचीत्. Desid. जुग्रोचिषति or जुग्रुचिषति, Deri ग्रुक्त, ग्रोचित्वा or ग्रुचित्वा or ग्रुक्त्वा.

ग्लुह् (ग्लुहू-Set) 1 A. ग्रहणे । to take.

ग्लुंच् (ग्लुंचु-Set) 1 P. गतौ । to go. Deri. ग्लुक्त. ग्लुचित्वा or ग्लुक्त्वा

ग्लेप् (ग्लेपृ-Set) 1 A. दैन्येकंपनेच । to be poor or miserable; to shake; Caus. Aor. अजिग्लेपत्-त.

ग्लेव् (ग्लेवृ–Set) 1 A. सेवने । to serve or worship; Caus. Aor. अजिग्लेवत्–त.

ग्लेष् (ग्लेषृ–Set) 1 A. अन्विच्छायाम् । to seek, Caus. Aor. अजिग्लेषत्–त

ग्ले (Anit) 1 P. हर्षक्षये—क्लमेच । to despond. to wane; to be fatigued, Perf. जग्लौ Bene. ग्लायासं or ग्लेयासं Caus. ग्लापयति–ते or ग्लपयति–ते. (But प्रग्लापयति–ते). अजिग्लपत्–त. Deri. ग्लान, प्रग्लाय, ग्लेय, जग्लिवस्

घघ् (Set) 1 P. हसने । to laugh; Aor. अघघीत् or अघाघीत.

घट् (घट–Set) 1 A. चेष्टायाम् । to act; to be intently occupied with; to happen; to be united with; to come to, to reach. Caus. घटयति–ते, अजीघटत्–त, Pass. Aor. अघाटि or अघटि.

घट्ट् (घट्ट–Set) 1 A. चलने । to shake.

घंट् (घटि–Set) 1 P. भाषायाम् । to speak; to shine.

घर्च् (Set) 1 P. गतौ । to go.

घस् (घस्लृ–Anit.) 1 P. अदने । to eat; to devour (This is a defective root used only to form certain tenses of अद् viz.—Perfect, Aorist, Desiderative. It is not conjugated in the Perfect, the Benedictive, the Present, Passive, the Causal, &c. Act. घसति, अवसत, घसतु, घसेयं, घस्तास्मि, घत्स्यति, अघत्स्यत. अघसत् Pass. घत्स्यते, अघासि, Desid. जघत्सति, Deri. घस्त, घस्तुं घस्त्वा.

घिण्ण्(घिणि–Set) 1 A. ग्रहणे । to take.

घु (घु–ङ्–Anit) 1 A. शब्दे । to sound.

घुट् (घुट–Set) 1 A. परिवर्तने । to return; to exchange.

घुण् (घुण–Set) 1 A. भ्रमणे । to stagger, to reel.

घुण्ण् (घुणि–Set) 1 A. ग्रहणे । to take.

घुष् (घुषि–Set) 1 A. कांतिकरणे । to be beautiful or brilliant, Aor. अघोषिष्ट.

घुष् (घुषिर्-Set) 1 P. अविशब्दने । to sound. to proclaim, Aor. अघुषत् or अघोषीत्, Desid. जुघोषिषति or जुघुषिषति. Deri. घुष्ट or घुषित or घोषित, घुषित्वा or घोषित्वा, संघुष्य, जुघुष्वस्.

घुंष् (घुषि-Set) 1 A. कांतौ । to diffuse lustre.

घूर्ण् (घूर्ण-Set) 1 A. भ्रमणे । to whirl; to roll; to reel.

घृ (Anit) 1 P सेचने । to sprinkle.

घृण्ण् (घृणि-Set) 1 A. ग्रहणे । to take.

घृष् (घृषु-Set) 1 P. संघर्षे । to grind, to pound, to strike, to rub, to brush, to polish. Caus. Aor. अजघर्षत्-त or अजीघृषत्-त, Deri. घर्षित्वा or घृष्ट्वा.

घ्रा (Anit) 1 P. गंधोपादाने । to smell; Act. जिघ्रति, अजिघ्रत्, जिघ्रतु, जिघ्रेयं, जघ्रौ, जघ्रिथ or जघ्राथ, घ्रातास्मि, घ्रास्यति, अघ्रास्यत्, अघ्रात् or अघ्रासीत्, घ्रेयासं, or घ्रायासं. Pass. घ्रायते, घ्रास्यते or घ्रायिष्यते, अघ्रायि, अघ्रासि or अघ्रायिषि Caus. घ्रापयति—त, अजिघ्रपत्-त or अजिघ्रिपत्-त, Desid. जिघ्रासति Deri. घ्रात or घ्राण, घ्रेय, घ्रातुं, घ्रात्वा, विघ्राय, जघ्रिवस्.

ङु (ङुङ्-Anit) 1 A. शब्दे । to sound.

चक् (चकृ-Set) 1 A. तृप्तौप्रतिघातेच । to be satisfied, to repel; to resist, to shine. Aor. अचकिष्ट. Caus. चाकयति-ते. अचीकचत्-त.

चक् (घटादिः-Set) 1 P. तृप्तौ । to be satisfied, Aor. अचकीत् or अचाकीत्, Caus. चकयति—ते. अचीचकत्—त. Pass. चक्यते, अचाक, अचाकि.

चंक् (a sautra root) 1 P. भ्रांतौ । to reel; to roll.

चंच् (चंचु-Set) 1 P. गतौ । to go; to shake; to leap.

चट् (चटे—Set) 1 P. वर्षावर्णयोः । to break, to rain, to cover; Aor. अचटीत्.

चण (घटादिः-Set) 1 P. गतौ शब्देच । to go, to sound. Aor. अचणीत् or अचाणीत्, Caus. चणयति—ते, अचीचणत्—त Pass. चण्यते, अचणि or अचाणि.

चंड् (चडि॒-Set) 1 A. कोपे । to be angry.

चत्
चद् { चते॑—Set } 1 U. याचने । to beg, to request, Aor. अचतीत्—अचतिष्ट, अचदीत्-अचदिष्ट.

चन् (घटादिः—Set) 1 P. हिंसायाम् । to kill. Aor. अचनीत् or अचानीत्. Pass. चन्यते. अचनि or अचानि, Caus. चनयति-ते, अचीचनत्—त.

चंद् (चदि-Set) 1 P. आल्हादे दीप्तौच to be glad; to shine.

चप् (Set) 1 P. सान्त्वने । to console; to soothe; Aor. अचपीत् or अचापीत्.

चम् (Set) 1 P. अदने । to eat; to drink, (with आ to sip) चमति (आचामति), अचमत् (आचामत्), चमतु (आचामतु), चमेयं (आचामेयं), चचाम, चेमिथ, चमितास्मि, चमिष्यति, अचमिष्यत्, अचमीत्, चम्यासं Pass. चम्यते, चमिष्यते, अचामि, अचमिषि Caus. चामयति, अचीचमत्, Desid. चिचमिषति Deri. चांत, चम्य, चमितुं, चमित्वा or चांत्वा, आचम्य, चमत् (आचामत्), चेमिवस्.

चंप् (चपि—Set) 1. P. गतौ । to go.

चंब् (Set) 1 P गतौ । to go.

चय् (चय॒—Set) 1 A. गतौ to go,

चर् (Set) 1. P. गतौ to go; to walk, to graze; to eat; Pass. Aor. अचारि, अचरिषि, Deri. चर्य, (also आचार्य an instructor), चेरिवस्, चेराण,

चर्च् (Set) 1 P. परिभाषण-हिंसा-तर्जनेषु । to discuss, to condemn; to censure.

चर्व् (Set) 1 P. गतौ । to go.

चर्व् (Set) 1 P. अदने । to chew, to eat; to browse; to chop; to bite.

चल् (घटादिः-Set) 1 P. कम्पने । to shake, Pass. Aor. अचालि (अचलिषि. Caus. चलयति (also चालयति changes, throws, &c.

चष् (चष॑—Set) 1 U. भक्षणे । to eat; Aor. अचषीत् or अचाषीत्.

चह् (Set) 1 P. परिकल्कने। to be wicked; to be proud; to cheat.

चाय् (चायृ—Set) 1 U पूजा-निशा-मनयोः। to worship, to discern, Caus. Aor. अचचायत्-त

चिट् (Set) 1 P. परिप्रेष्ये। to send out.

चित् (चिती—Set) 1 P. संज्ञाने। to perceive; to think; to recover consciousness, Desid. चिचेतिषति or चिचितिषति, Deri. चित्त, चेतितुं, चेतित्वा or चितित्वा.

चिंत् (चिति-Set) 1 P. स्मृत्यां। to remember.

चिल्ल् (Set) 1 P. शैथिल्ये-भावकरणेच। to become loose; to act wantonly; to sport.

चीक् (Set) 1 P. आमर्षणे। to endure;

चीभ् (चीभृ—Set) 1 A. कत्थने। to coax, to boast, Caus. Aor. अचिचीभत्-त.

चीव् (चीवृ—Set) 1 U. आदान-संवरणयोः to take, to wear, to cover, Caus. Aor. अचिचीवत्-त.

चुच्य् (Set) 1 P. अभिषवे। to bathe, to churn, to press.

चुड्ड् (Set) 1 P. भावकरणे। to sport, to hint one's meaning.

चुंट् (चुटि-Set) 1 P. छेदने। to cut off.

चुंड् (चुडि-Set) 1 P. अल्पभावे-छेदनेच। to become small, to cut off.

चुप् (Set) 1 P. मंदायांगतौ। to move slowly.

चुंब् (चुबि-Set) 1 P. वक्त्रसंयोगे। to kiss.

चुलुंप् (Set) 1 P. चलने। to swing, to rock; to agitate.

चुल्ल् (Set) 1 P. भावकरणे। to sport, to make amorous gestures.

चूष् (Set) 1 P. पाने। to drink.

चृप् (Set) 1 P, संदीपने। to excite; to light.

चेल् (चेलृ-Set) 1 P. चलने। to shake; to go; Caus. Aor. अचिचेलत्-त.

चेष्ट् (चेष्ट-Set) 1 A. चेष्टायाम् । to act; Caus. चेष्टयति, अचिचेष्टत or अचचेष्टत्.

च्यु (च्यु-ङ्-Anit) 1 A. गतौ । to go; to drop down, to fall, to swerve. Aor. अच्योष्ट, अच्योढ्वं, अच्योषि. Pass. च्यूयते, च्योष्यते or च्याविष्यते, अच्यावि, अच्योषि or अच्याविषि, Caus. च्यावयति-ते. अचुच्यवत्-त. or अचिच्यवत-त. Desid. चुच्यूषते. Caus. Desid. चिच्यावयिषति-ते or चुच्यावयिषति-ते. Deri. च्युत, च्यव्य, (also च्याव्य).

च्युत् (च्युतिर्—Set) 1 P. आसेचने । to flow; to trickle; Aor. अच्युतत् or अच्योतीत्, Dasid. चुच्योतिषति or चुच्यूतिषति, Deri. च्युतित or च्योतित, च्योतित्वा, च्युतित्वा.

छद् (Set) 1 U. आच्छादने । to cover; to veil; to hide; Aor. अच्छदीत्, अच्छादीत्, अच्छदिष्ट. Deri. छन्न, आच्छद्य.

छन्द् (छदि-Set) 1 P. संवरणे । to cover.

छम् (छमु-Set) 1 P. अदने । to eat, to consume. Aor. अच्छमीत् Deri. छांत, छमित्वा or छांत्वा.

छष् (छष—Set) 1 U. हिंसायाम् । to hurt; to injure, to kill. Aor. अच्छषीत् or अच्छीषीत्, अच्छषिष्ट.

छृद् (Set) 1 P. संदीपने । to kindle.

छृष् (Set) 1 P. याचने । to beg or request.

जज् (Set) 1 P. युद्धे । to fight. Aor. अजजीत् or अजाजीत्.

जंज् (जजि-Set) 1 P. युद्धे । to fight.

जट् (Set) 1 P. संघाते । to become matted (as hair) Aor. अजटीत् or अजाटीत्.

जड् (Set) 1 P. संघाते । to heap. Aor. अजडीत् or अजाडीत्,

जप् (Set) 1 P. व्यक्तायां-वाचि—मानसेच । to mutter, to mediate, Aor. अजपीत् or अजापीत् Pass. जप्यते, अजापि, अजपिषि. Caus. जापयति-ते, अजीजपत्-त. Deri. जेपिवस्.

जभ् (जभी-Set) 1 A. गात्रविताने । to yawn. to gape जंभते, अजंभत, जंभतां, जंभेय, जजंभे. जजंभिषे, जंभिताहे, जंभिष्यते, अजंभिष्यत, अजंभिष्ट, जंभिषीय. Pass. जंभ्यते. जंभिष्यते, अजंभि Caus. जंभयाति, भजजंभत्. Desid. जिजंभिषते. Deri. जब्ध, जंभितुं, जंभित्वा, जजंभान.

जम् (जमु-Set) 1 P. अदने । to eat; Aor. अजमीत्. Deri. जांत, जमित्वा or जांत्वा.

जंम् (Set) 1 P. नाशने । to destroy.

जर्च्
जर्छ् (Set) 1 P. परिभाषण-हिंसा—तर्जनेषु । to speak, to blame.
जर्ज् to kill, to threaten.

जल् (Set) 1 P. घातने । to strike, to be rich, to hide; to encircle, to be sharp; to be cold, stiff, dull, or dumb. Aor. अजालीत्.

जल्प् (Set) 1 P. व्यक्तायां वाचि । to speak, to prattle, to babble, to murmer, to chatter, to praise. प्रजल्प्य.

जष् (Set) 1 P. हिंसायाम् । to kill, Aor. अजषीत् or अजाषीत्.

जस् (जसु-Set) 1 P. हिंसायां-ताडनेच । to injure, to strike. Aor. अजसीत् or अजासीत् Deri. जस्त, जसित्वा or जस्त्वा.

जंस् (Set) 1 P. रक्षणे—मोक्षणेच । to protect, to release;

जि (Anit) 1 P (but after वि or परा A.) जये—अभिभवेच , to conquer; to overcome; to surpass, to win, to restrain. जयति-ते, अजयत्-त, जयतु-तां, जयेयं—य, जिगाय-जिग्ये, जिगयिथ, or जिगेथ-जिग्यिषे, जेतास्मि-हे. जेष्यति—ते, अजेष्यत्—त. अजैषीत्-अजेष्ट, जीयासं—जेषीय. Pass. जीयते, जेष्यते or जायिष्यते, अजायि. अजेषत or अजायिषत. अजेढ्ढं—अजायिध्वं-ढ्वं, Caus. जापयति-ते. अजीजपत्—त, Desid. जिगीषति—ते. Deri. जित, जेय (also जय्य), जेतुं, जित्वा, विजित्य, जयत्—मान, जिगीवस्—जिग्यान.

जिन्व् (जिवि—Set) 1 P. प्रीणने । to please; to be lively, active busy; to excite; to animate, to promote, to confer.

जिम् (जिमु—Set) 1 P. भक्षणे, । to eat. Deri. जिन्त, जेमित्वा, or जिन्त्वा.

जिष् (जिषु—Set) 1 P. सेचने । to sprinkle; Deri. जिष्ट, जेषित्वा or जिष्ट्वा.

जीव् (Set) 1 P. प्राणधारणे । to live, to revive, to live upon. Perf. जिजीव Caus. जीवयति-ते. अजीजिवत्-त or अजिजीवत्, -त. Desid. जिजीविषति.

जु (a Sautra root. Anit) 1 U. गतौवेगेच । to go, to be quick, जवति-ते. जुजाव—जुजुवे, जोतास्मि—हे. जोष्यति—ते, अजौषीत्-अजोष्ट. जूयासं—जोषीय, Pass. जूयते, जूष्यते, अजावि, Caus. जावयति—ते, अजूजवत्—त. Desid. जुजूषति—ते. Deri. जुत, जुत्वा, जोतुं.

जुग् (जुगि-Set) 1 P. वर्जने । to abandon; to exclude,

जुत् (जुतृ-Set) 1 A. भासने । to shine. Caus. Aor. अजुजोतत्—त.

जुष् (Set) 1 P. परितर्कणे—परितर्पणेच । to reason; to investigate; to be satisfied; to hurt.

जूष् (Set) 1 P. हिंसायाम् । to kill; to hurt;

जृंभ् (जृभि–Set) 1 A. गात्रविताने । to gape; to yawn; to expand; to open; to spread; to increase, appear, to rise, Perf. जजृंभे.

जॄ (Set) 1 P. वयोहानौ । to grow old, to waste away; to decay; Act. जरति, अजरत्, जरतु, जरेयं. जजार, जजरिथ, जरितास्मि or जरीतास्मि, जरिष्यति or जरीष्यति, अजरिष्यत् or अजरीष्यत्, अजारीत्, जीर्यासं, Pass. जीर्यते, जरिष्यते, or जरीष्यते, or जारिष्यते. अजारि, अजरिषत or अजरीषत or अजीर्षत or अजीरिषत, Caus. जारयति—ते Desid. जिजरिषति or जिजरीषति or जिजीर्षति, Deri. जीर्ण, जरितुं or जरीतुं, जरित्वा, जरीत्वा, जरत्.

जेष् (जेषृ–Set) 1 A. गतौ । to go. Perf. जिजेषे Caus. जेषयति—ते, अजिजेषत्-त

जेह् (जेहृ॒–Set) 1 A. प्रयत्ने गतावपि । to try, to go. Caus. जेहयति —ते. अजिजेहत्–त.

जै (Anit) 1 P. क्षये । to decay.

ज्यु (ज्यु-ङ्-Anit) 1 A. गतौ । to go.

ज्रि (Anit) 1 P. जये अभिभवेच । to conquer; to defeat, to grow old;

ज्वर् (Set) 1 P. रोगे । to be hot with fever or passion; to be ill. Aor. अज्वारीत् Caus. ज्वरयति, अजिज्वरत् Pass. ज्वर्यते अज्वरि, अज्वारि, Deri. जूर्ण.

ज्वल् (Set) 1 P. दीप्तौ । to blaze; to glow; to shine, Aor. अज्वालीत्, Caus. ज्वलयति—ते, ज्वालयति-ते, (but with प्र प्रज्वलयति-ते). Pass. ज्वल्यते, अज्वलि or अज्वालि. Deri. प्रज्वल्य.

झट् (Set) 1 P. संघाते । to become matted together (as hair), to become confused or entangled. Aor. अझटीत् or अझाटीत्.

झम् (झमु–Set) 1 P. अदने । to eat; to consume. Aor. अझमीत् Deri. झांत, झमित्वा or झांत्वा, झमितुं.

झर्झ् (Set) 1 P. परिभाषण–हिंसा–तर्जनेषु । to speak; to hurt, injure or kill: to menace. Aor. अझर्झीत्.

झष् (Set) 1 P. हिंसायाम् । to hurt, injure or kill.

झष् (झषँ Set) I U. आदान—संवरणयोः । to take, to put on or wear- Aor. अझषीत्. अझाषीत्, अझाषिष्ट.

टंक् (Set) 1 P. बंधने । to bind.

टल् (Set) 1 P. वैक्लव्ये । to be confused. Aor. अटालीत्.

टिक् (टिकृ॒–Set) 1 A. गतौ । to go; टेकते. Caus. टेकयति–ते. अटिटेकत्–त.

टीक् (टीकृ॒–Set) 1 A. गतौ । to go, to resort to. टीकते Caus. टीकयति–ते. अटिटीकत्–त.

टौक् (टौकृ॒—Set) 1 A. गतौ । to go.

द्वल् (Set) 1 P. वैक्लव्ये । to be confused, Aor. अद्वालीत्.

डी (ढी-ङ्-Set) 1 A. विहायसागतौ । to fly; to pass through the air; Act. डयते, डिड्ये, डिड्यिषे, डयिताहे, डयिष्यते, अडयिष्यत, अडयिष्ट, डयिषीय. Pass. डीयते, डयिष्यते or डायिष्यते. अडायि Caus. डाययति-ते. अडीडयत्-त. Desid. डिडयिषते. Deri. डयित. डयित्वा. डयितुं.

ढौक् (ढौकृ—Set) 1 A. गतौ । to go, to approach. P. डुढौक, Caus. ढौकयति-ते. अडुढौकत्—त Deri. उपढौक्य. डुढौकान.

तक् (Set) 1 P. हसने-सहनेच । to laugh at; to bear, to fly or rush upon, Aor. अतकीत् or अताकीत्.

तक्ष् (तक्षू-Wet) 1 P. तनूकरणे । to cut off; to make thin; to wound, to form; Act. तक्षति, ततक्ष, ततक्षिथ or ततष्ठ, तक्षितास्मि or तष्टास्मि, तक्षिष्यति or तक्ष्यति, अतक्षिष्यत् or अतक्ष्यत्, अतक्षीत् or अताक्षीत्, तक्ष्यासं. Pass. तक्ष्यते, तक्षिष्यते or तक्ष्यते, अतक्षि Caus. तक्षयति—ते, अततक्षत्-त, Desid. तितक्षिषति or तितक्षति Deri. तष्ट. तक्षितव्य or तष्टव्य, तक्षितुं or तष्टुं. तक्षित्वा or तष्ट्वा, संतक्ष्य.

तक्ष् (Set) 1 A. त्वचने—संवरणेच । to eat; to pare, to cover; Aor. अतक्षीत,

तंक् (तकि-Set) 1 P. कृच्छ्रजीवने । to live in distresss.

तंग् (तगि—Set) 1 P. गतौ स्खलने कंपनेच । to go; to stumble; to tremble.

तंच् (तंचु-Set) 1 P. गतौ । to go. Deri. तक्त. तंचित्वा or तक्त्वा. तंचितुं.

तट् (Set) 1 P. उच्छ्राये । to be raised, to rise, to groan, Aor. अतटीत् or अताटीत्.

तंड् (तडि—Set) 1 A. ताडने । to strike.

तन् (तनु—Set) 1 P. श्रद्धोपकरणयोः । to confide in, to assist; to pain with disease, to be harmless, to sound, Aor. अतनीत or अतानीत्. Deri. तत, तनित्वा or तत्वा, तनितुं.

तंद्र् (तद्रि a sautra root) 1 P. अवसादे—मोहेच। to be exhausted, to be disturbed in mind.

तप् (Anit) 1 P. संतापे। to shine, to be hot; to make hot, to suffer pain, to injure or hurt, to undergo, to perform penance (A. with a limb of the agent's body for its object.) Act. तपति-ते, तताप-तेपे, तेपिथ, ततप्थ, तप्तास्मि-हे, तप्स्यति-ते, अताप्सीत्. अतप्त तप्यासं. Pass. तप्यते, तप्स्यते, अतप्त. अतापि Caus. तापयति-ते, अतीतपत्-त, Desid. तितप्सति-ते. Deri. तप्त, तप्तुं, तप्त्वा. संतप्य, तेपिवस्, तेपान.

तय् (तय—Set) 1 A. गतौ। to go.

तर्ज् (Set) 1 P. भर्त्सने। to threaten, to terrify, to scold, to mock.

तर्द् (Set) 1 P. हिंसायाम्। to injure, to hurt or kill.

तंस् (तसि-Set) 1 P अलंकरणे। to decorate. (also A. when Vedic.) to shake, to pour out, to request.

ताय् (तायृ—Set) 1 A. संतान-पालनयोः। to spread, to protect. to preserve, Caus. ताययति—ते. अततायत्—त.

तिक् (तिकृ—Set) 1 A. गतौ to go or move, तेकते. Caus. तेकयति-ते. अतितेकत्-त.

तिज् (तिज-Set) 1 A. निशाने। to whet, Act. तेजते, तितिजे, तेजिताहे, तेजिष्यते, अतेजिष्ट, तेजिषीय. Pass तिज्यते, तेजिष्यते. अतेजि. Caus. तेजयति-ते, अतीतिजत्-त. Desid. तितेजिषते or तितिजिषते, Deri. तिजित, तिजित्वा or तेजित्वा, तेजितुं.

तिज् (तिज-Set) 1 A. क्षमायां। to endure or bear patiently. Act. तितिक्षते, अतितिक्षत, तितिक्षतां, तितिक्षेय, तितिक्षांचक्रे, तितिक्षिताहे, तितिक्षिष्यते. अतितिक्षिष्यत. अतितिक्षिष्ट, तितिक्षिषीय, Pass. तितिक्ष्यते, तितिक्षिष्यते अतितिक्षि, Caus. तितिक्षयति-ते, अतितिक्षत्-त, Desid. तितिक्षिषते, Deri. तितिक्षित, तितिक्षितुं, तितिक्षित्वा.

तिप् (तिपृ-Anit) 1 A. क्षरणे। to drop, to ooze, Act. तेपते, अतेपत तेपतां, तेपेय, तितिपे, तेप्ताहे, तेप्स्यते, अतेप्स्यत, अतिप्त, तिप्सीय,

Pass. तिप्यते, तेप्स्यते, अतेपि, Caus. तेपयति—ते, अतितेपत्—त, Desid. तितिप्सते, Deri. तिप्त, तेप्तुं, तिप्त्वा, तेपमान, तितिपान.

तिल् (Set) 1 P. गतौ । to go. तेलति.

तिल्ल् (Set) 1 P. गतौ । to go तिल्लति.

तीकृ (तीकृ-Set) 1 A. गतौ । to go. तीकते. Caus. तीकयति—ते, अतितीकत्—त.

तीव् (Set) 1 P. स्थौल्ये । to be strong or fat or corpulent

तुज् (Set) 1 P. हिंसायाम् । to hurt, injure or kill. तोजति.

तुंज् (तुजि-Set) 1 P. प्रापण-हिंसा-बलीदान-निकेतन-पालनेषु । to reach, to kill, to be strong, to take, to dwell, to protect to clothe, to strike, to push, to emit, to incite, to give.

तुड् (तुडृ-Set) 1 A. तोडने । to split, to push, to injure, to hurt, Caus. Aor. अतुतोडत्-त.

तुड्ड् (Set) 1 P. अनादरे । to disregard, to condemn.

तुंड् (तुडि-Set) 1 A. तोडने । to press out, to break.

तुप् (Set) 1 P. हिंसायाम् । to injure, hurt or kill. तोपति.

तुफ् (Set) 1 P. हिंसायाम् । to injure, hurt or kill. तोफति.

तुभ् (तुभ्-Set) 1 A. हिंसायाम् । to injure hurt or kill. तुतुभे, Aor. अतुभत् or अतोभिष्ट.

तुंप् } Set { 1 P. हिंसायाम् । to injure, hurt or kill. Bene,
तुंफ् } { तुप्यात्, तुफ्यात्. Pass. तुप्यते, तुफ्यते.

तुंब् (तुबि-Set) 1 P. अर्दने । to distress, to hurt.

तुर्व् (तुर्वी—Set) 1 P. हिंसामाम् । to kill तु-तूर्वति, तुतुर्व-तुतूर्व, तु-तूर्वितास्मि, तु-तूर्विष्यति, अतुर्वीत्-अतूर्वीत्, तु-तूर्व्यासं.

तुस् (Set) 1 P. शब्दे । to sound.

तुह् (तुहिर्-Set) 1 P. अर्दने-वधेच । to hurt, to kill, to pain, Aor. अतुहत् or अतोहीत्.

तूड् (तूडृ—Set) 1 P. तोडने—अनादरेच । to split, to disregard. Caus. Aor. अतुतूडत्—त.

तुल् (Set) 1 P. निष्कर्षे । to weigh, to measure.

तूष् (Set) 1 P. तुष्टौ । to satisfy or to be satisfied,

तृक्ष् (Set) 1 P. गतौ । to go.

तॄ (Set) 1 P. प्लवन-तरणयोः । to swim, to cross over, to float, to surmount; to master completely, to fulfil, to escape from, Act. तरति, ततार, तेरिथ, तरितास्मि or तरीतास्मि, तरिष्यति or तरीष्यति, अतरिष्यत् or अतरीष्यत्, अतारीत्, तीर्यासं, Pass. तीर्यते, तरिष्यते or तरीष्यते or तारिष्यते, अतारि, Caus. तारयति—ते, अतीतरत्-त. Desid. तितीर्षति or तितरिषति or तितरीषति. Deri. तीर्ण, तरितव्य or तरीतव्य, तरितुं, or तरीतुं, तीर्त्वा, उत्तीर्य, तरत्-तरिष्यत् or तरीष्यत्, तितीर्वस्.

तेज् (Set) 1 P. पालने । to protect.

तेप् (तेपृ-Set) 1 A. क्षरणे-कंपनेच । to ooze, to shake. Caus. Aor. अतितेपत्-त.

तेव् (तेवृ-Set) 1 A. देवने । to lament; to play, Caus. Aor. अतितेवत्-त.

तोड् (तोडृ—Set) 1 P. अनादरे । to disregard, Caus. Aor. अतुतोडत्-त.

त्यज् (Anit) 1 P. हानौ । to abandon, to leave, to quit, to let go, to renounce, to except, to distribute, to disregard, Act. त्यजति, तत्याज, तत्यजिथ, तत्यक्थ, त्यक्तास्मि, त्यक्ष्यति. अत्याक्षीत्, त्यज्यासं, Pass. त्यज्यते, त्यक्ष्यते, अत्याजि, Caus. त्याजयति-ते, अतित्यजत्-त, Desid. तित्यक्षति, Deri. त्यक्त, त्यक्त्वा, त्यक्तुं, संतज्य, तत्यज्वस्.

त्रख् (Set) 1 P. गतौ । to go. Aor. अत्रखीत् or अत्राखीत्.

त्रंक् (त्रकि-Set) 1 A. गतौ । to go.

त्रंख् { त्रखि }
त्रंग् { त्रगि } Set 1 P. गतौ to go.

त्रंद् (त्रदि—Set) 1 P. चेष्टायाम् । to act; to try; to be busy or active.

त्रप् (त्रपू-ष्—Wet) 1 A. लज्जायाम् । to be ashamed or abashed; to be embarrassed, Act. त्रपते, त्रेपे, त्रेपिषे, त्रेप्से, त्रपिताहे—त्रप्ताहे, त्रपिष्यते,—त्रप्स्यते, अत्रपिष्यत or अत्रप्स्यत, अत्रपिष्ट-अत्रप्त, त्रपिषीय—त्रप्सीय, Pass. त्रप्यते, त्रपिष्यते or त्रप्स्यते, अत्रापि, Caus. त्रपयति-ते, अतित्रपत्-त, Desid. तित्रपिषते or तित्रप्सते, Deri. त्रप्त, त्रपितव्य or त्रप्तव्य, त्रपितुं or त्रप्तुं, त्रपित्वा or त्रप्त्वा, त्रेपाण.

त्रंस् (त्रसि—Set) 1 P. भाषायाम्-दीप्तौच । to speak; to shine.

त्रिख् (त्रिखि—Set) 1 P. गतौ । to go.

त्रुप्
त्रुफ् Set 1 P. हिंसायाम् । to kill, injure or hurt.
त्रुंप्
त्रुंफ्

त्रै (त्रै-ङ्—Anit) 1 A. पालने । to protect. Act. त्रायते, तत्रे, तत्रिषे, त्राताहे, त्रास्यते, अत्रास्यत, अत्रास्त, अत्रासत, त्रासीय, Caus. त्रापयति-ते, अतित्रपत्-त, Desid. तित्रासते, Deri. त्रात or त्राण, त्रातुं, त्रात्वा, परित्राय.

त्रौक् (त्रौकृ—Set) 1 A. गतौ । to go Caus. Aor. अतुत्रौकत्-त.

त्वक्ष् (त्वक्षू—Wet) 1 P. तनूकरणे । to make thin. (forms are similar to तक्ष्-त्व. being substituted for त).

त्वंग् (त्वगि-Set) 1 P. गतौ कंपनेच । to go; to tremble.

त्वंच् (त्वंचु-Set) 1 P. गतौ । to go; Bene. त्वच्यासं Pass. त्वच्यते Deri. त्वक्त, त्वंचित्वा or त्वक्त्वा, त्वंचितुं.

त्वर् (ञि—त्वरा-Set) 1 A. संभ्रमे । to hurry; to make haste; Caus. त्वरयति-ते, अतत्वरत्-त, Pass. त्वर्यते, अत्वारि or अत्वरि Deri. त्वरित, तूर्ण.

त्विष् (त्विषँ—Anit) 1 U. दीप्तौ । to shine; to glitter. Act. त्वेषति-ते. तित्वेष—तित्विषे, त्वेष्टास्मि—हे, त्वेक्षति-ते, अत्वेक्ष्यत्—त, अत्विक्षत्—त, त्विष्यासं—त्विक्षीय, Desid. तित्विक्षति—ते, Deri. त्विष्ट त्वेष्टुं, त्विष्ट्वा.

त्सर् (Set) 1 P. छद्मगतौ । to creep; to crawl; to proceed crookedly or fraudulently.

थुर्व् (थुर्वी—Set) 1 P. हिंसायाम् । to injure, hurt or kill, थु-थूर्वति तुथुर्व-तुथूर्व, थु-थूर्वितास्मि, थु-थूर्विष्यति, अथु-थूर्वीत्, थूर्व्यासं.

दक्ष् (दक्ष—Set) 1 A. वृद्धौ शीघ्रार्थेच । to increase, to do or act quickly.

दक्ष् (दक्ष घटादिः—Set) 1 A. गतिहिंसनयोः । to go; to kill; Caus. दक्षयति—ते, अददक्षत्—त, Pass. दक्ष्यते, अदक्षि or अदाक्षि.

दद् (दद-Set) 1 A. दाने । to give; to offer; to present. Perf. ददे, Caus. दादयति-ते, अदीददत्-त.

दध् (दध—Set) 1 A. धारणे । to hold: to possess. Perf. देधे.

दंश् (दशि—Anit) 1 P. दशने । to bite; to sting; दशति, अदशत्, दशतु, दशेयं, ददंश, ददंशिथ or ददंष्ठ, दंष्टास्मि, दंक्ष्यति, अदंक्ष्यत्, अदांक्षीत्, दश्यासं, Pass. दश्यते, दंक्ष्यते. अदंशि, Desid. दिदंक्षति, Deri. दष्ट, दंष्टुं, दष्ट्वा, उपदश्य.

दय् (दय—Set) 1 A. दान—गति—रक्षण—हिंसाऽऽदानेषु । to pity. to give; to go; to protect; to kill; to take, दयते, दयांचक्रे. Caus. दाययति-ते, अदीदयत्-त.

दल् (Set) 1 P. विशरणे । to break; to split; to expand, to open; Caus. दलयति—ते, or दालयति—ते, अदीदलत्—त.

दह् (Anit) 1 P. भस्मीकरणे । to reduce to ashes; to burn; to scorch; to torment. Act. दहति, ददाह, देहिथ, ददग्ध, दग्धास्मि, धक्ष्यति, अधाक्षीत्, दह्यासं Pass. दह्यते, धक्ष्यते, अदाहि. Caus. दाहयति—ते, अदीदहत्-त, Desid. दिधक्षति, Deri. दग्ध-दग्ध्वा, संदह्य, दग्धुं.

दा (दा-ण्-Anit) 1 P. दाने । to give. 'with सम् A.' Act. यच्छति—ते, अयच्छत्—त, यच्छतु, यच्छतां, यच्छेयं—य, ददौ-दे, ददिथ, ददाथ, ददिषे, दातास्मि—हे दास्यति—ते, अदास्यत्—त, अदात्, अदित, देयासं, दासीय, Pass. दीयते, दास्यते or दायिष्यते, अदायि, Caus. दापयति—ते, अदीदपत्—त, Desid. दित्सति- ते Deri. दत्त, दातव्य, देय, दातुं, दत्वा, संदाय, यच्छत् , यच्छमान, दास्यत्, दास्यमान, ददिवस् , ददान.

दान् (दान॑ Set) 1 U. खंडने-आर्जवेच । to cut off; to straighten, Act. दीदांसति—ते, दीदांसांचकार—चक्रे, दीदांसितास्मि—हे, दीदांसिष्यति—ते. अदीदांसीत्, अदीदांसिष्ट, दीदांस्यासं, दीदांसिषीय, Pass. दीदांस्यते, अदीदांसि, Caus. दीदांसयति—ते, अदीदांसत—त, Desid. दीदांसिषति—ते, Deri. दीदांसित, दीदांसितुं, दीदांसित्वा.

दाय् (दायृ—Set) 1 A. दाने । to give; Caus. Aor. अददायत्—त.

दाश् (दाशृ॑—Set) 1 U. दाने । to give; to offer an oblation; Caus, Aor. अददाशत्—त.

दास् (दासृ॑—Set) 1 U. दाने । to give, Caus. Aor. अददासत्—त.

दिन्व् (दिवि—Set) 1 P. प्रीणने । to be glad or pleased, to gladden, to please.

दिव् (दिवु-Set) 1 P. देवने । to lament; देवति. Deri. देवित्वा or द्यूत्वा.

दीक्ष् (दीक्ष—Set) 1 A. मौण्डे-ज्योपनयन—नियम—व्रतादेशेषु । to be shaved; to perform a sacrifice, to invest with a sacred thread; to practise self-restraint; to teach religious observances; to prepare oneself for the performance of a sacred rite; to dedicate oneself to.

दु (Anit) 1 P. गतौ । to go; Act. दवति, दुदाव, दोतास्मि, दोष्यति, अदौषीत् , दूयात्, Deri. दून, दूत्वा, दोतुं.

दुर्व् (दुर्वी-Set) 1 P. हिंसायाम् । to kill; Act. दु-दूर्वति, Deri. दूर्त.

दुह् (दुहिर्-Set) 1 P. अर्दने । to injure, hurt or kill; Aor. अदुहत् or अदोहीत्.

दृप् (Set) 1 P. संदीपने । to light; to kindle; to inflame; दर्पति.

दृभ् (Set) 1 P. ग्रंथे । to tie; to string:

दृश् (दृशिर्—Anit) 1 P. प्रेक्षणे । to see; to behold; to visit; to learn, to investigate; (with सं A. to see well; to behold) Act. पश्यति—ते, अपश्यत्—त, पश्यतु—तां, पश्येयं—य, ददर्श—ददृशे, ददर्शिथ or दद्रष्ठ—ददृशिषे, द्रष्टास्मि-हे, द्रक्ष्यति-ते, अद्रक्ष्यत्-त अदर्शत् or अद्राक्षीत्—अदृष्ट, दृश्यासं—दृक्षीय, Pass. दृश्यते, द्रक्ष्यते or दर्शिष्यते, अदर्शि, Caus. दर्शयति-ते, (But दर्शयते only when reflexively used), अदीदृशत्—त or अददर्शत्—त Desid. दिदृक्षते Deri दृष्ट, द्रष्टव्य, दृश्य, द्रष्टुं दृष्ट्वा, संदृश्य, पश्यत्–मान, द्रक्ष्यत्—माण, ददृश्वस् or ददृशिवस्—ददृशान.

दृह (Set) 1 P. वृद्धौ । to increase; to prosper; to fasten; to be firm.

दृंह (दृहि–Set) 1 P. The same as above.

दॄ (Set–घटादिः) 1 P. भये । to fear; दराति, ददार, दरितास्मि–दरीतास्मि, दरिष्यति, दरीष्यति, अदारीत्, दीर्यासं, Caus. दरयति–ते, अदीदरत्–त. Deri. दीर्ण.

दे (दे–ङ्—Anit) 1 A. रक्षणे । to protect; Act. दयते, दिग्ये, दाताहे, दास्यते, अदित, अदिथाः, अदिढ्वं, अदिषि, दासीय, Pass. दीयते, अदायि, Caus. दापयति–ते, अदीदपत्, Desid. दित्सते, Deri. दत्त, दातुं, दत्वा, दयमान, दास्यमान, दिग्यान.

देव् (देवृ–Set) 1 A. देवने । to play, to sport; to lament. Caus. Aor. अदिदेवत्–त.

दै (दै–प्–Anit) 1 P. शोधने । to purify; to clearse, to be purified; Act. दायति, अदायत्, दायतु, दायेयं, Pre. P. दयत्.

द्युत् (द्युत–Set) 1 A. दीप्तौ । to shine; to be bright; द्योतते, दिद्युते, अद्युतत् or अद्योतिष्ट, Caus. द्योतयति–ते, अदुद्युतत्–त, Desid. दिद्युतिषते or दिद्योतिषते Deri. द्युतित or द्योतित, विद्युत्य, दिद्युतान.

द्यै (Anit) 1 P. न्यक्करणे । to despise; to disfigure, Act. Bene, द्यायासं or द्येयासं.

द्रम (Set) 1 P. गतौ । to go; to run.

द्राख् (द्राखृ Set) 1 P. शोषणालमर्थयोः । to become dry; to be able; to prevent; to adorn. Caus. Aor. अदद्राखत्–त.

द्राघ् (द्राघृ—Set) 1 A. सामर्थ्ये—आयामेच । to be able; to stretch; to exert oneself; to be weary; to vex; to wander about; Caus. Aor. अदद्राघत्—त.

द्रांक्ष् (द्राक्षि-Set) 1 P. कांक्षायाम्—घोरवासितेच । to desire, to utter a discordant sound.

द्राड् (द्राडृ-Set) 1 A. विशरणे । to cut, to split. Caus. Aor. अदद्राडत्—त.

द्राह् (द्राहृ—Set) 1 A. निद्राक्षये । to wake. Caus. Aor. अदद्राहत्-त.

द्रु (Anit) 1 P. गतौ । to go, to flow, to run; to retreat, to melt; to attack, to rush. Act. द्रवति, दुद्राव, दुद्रोथ, द्रोतास्मि, द्रोष्यति, अदुद्रुवत्, द्रूयासं, Caus. द्रावयति only. अदुद्रवत् or अदिद्रवत्, Desid. दुद्रूषति (दिद्रावयिषति or दुद्रावयिषति is the Desid. of the Caus. form).

द्रेक् (द्रेकृ-Set) 1 A. शब्दोत्साहयोः । to sound; to show joy; to be exhilarated. Caus. Aor अदिद्रेकत्—त.

द्रै (Anit) 1 P. स्वप्ने । to sleep; (mostly with नि) Bene. द्रायात् or द्रेयात्, Caus. द्रापयति—ते, अदिद्रपत्—त. Deri. द्राण, द्रात्वा, द्रातुं, निद्राय.

द्वृ (Anit) 1 P. संवरणे अंगीकृतौच । to cover, to appropriate.

धण् } (Set) 1 P. शब्दे । to sound, Aor. अधणीत् or अधाणीत्,
धन् } अधनीत् or अधानीत्.

धन्व् (धवि-Set) 1 P. गतौ । to go.

धाव् (धावु—Set) I U. गति-शुद्ध्योः । to run; to flow, to cleanse, to wash. Caus, Aor. अदीधवत्-त. Deri. धावित or धौत, धावितुं, धावित्वा or धौत्वा.

तम् (तमु–Set) 4 P. कांक्षायाम्—खेदेच । to desire, to be fatigued. ताम्यति, अताम्यत्, ताम्यतु, तताम, तेमिथ, तमितास्मि, अतमत्, तम्यासं, Caus. तमयति—ते, अतीतमत्—त; Deri. तांत, तमित्वा or तांत्वा, तमितुं.

तस् (तसु—Set) 4 P. उपक्षये । to fade away, to become exhausted, Deri. तस्त, तसित्वा or तस्त्वा, तसितुं.

तिम् (Set) 4 P. आर्द्रीभावे । to be wet, to be moist, Desid. तितिमिषति or तितेमिषति, Deri. तिमित, तिमित्वा or तेमित्वा, तेमितुं.

तीम् (Set) 4 P. क्लेदने । to be wet or moist.

तुभ् (Set) 4 P. हिंसायाम् । to kill.

तुष् (Anit) 4 P. तुष्टौ । to be pleased or delighted. तुतोष, तोष्टास्मि, तोक्ष्यति, अतोक्ष्यत्, अतुषत्, तुष्यासं, Deri. तुष्ट, तुष्ट्वा, परितुष्य, तोष्टुं.

तूर् (तूरी-Set) 4 P. गतित्वरणहिंसयोः । to go quickly, to make haste, to hurt or kill, P. P. तूर्ण.

तृप् (Wet) 4 P. तृप्तौ । to be satisfied or pleased, to please or satisfy. ततर्प, ततर्पिथ or ततर्प्थ or तत्रप्थ, तर्पितास्मि, तर्प्तास्मि or त्रप्तास्मि, अतृपत, अताप्सीत्, अत्राप्सीत्, अतर्पीत्, तृप्यासं Caus. Aor. अततर्पत्—त, अतीतृपत्—त, Desid. तितृप्सति, तितर्पिषति, Deri. तृप्त, तर्पित्वा, तृप्त्वा, तर्पितुं, तर्प्तुं, त्रप्तुं.

तृष् (ञि-तृषा—Set) 4 P. पिपासायां । to be thirsty, to wish, Caus. Aor. अतीतृषत्–त, अततर्षत्—त. Deri. तृषित, तर्षितुं, तृषित्वा or तर्षित्वा.

त्रस् (त्रसी–Set) 4 P. उद्वेगे । to fear, to tremble, Aor. अत्रसीत, अत्रासीत, Deri. त्रस्त, त्रसित्वा, त्रसितुं.

दम् (दमु—Set) 4 P. उपशमे । to be quiet, to restrain, to tame, to subdue. दाम्यति, अदाम्यत्, दाम्यतु, दाम्येयं, Caus. दमयते only. अदीदमत्, Deri. दमित, दांत, दमित्वा, दांत्वा, दमितुं, दमथुः

दस् (दसु—Set) 4 P. उपक्षये । to perish, Deri. दस्त, दसित्वा, दस्त्वा, दसितुं.

दिव् (दिव–Set) 4 P. क्रीडा–विजिगीषा–व्यवहार–द्युति—स्तुति—मोद—मद–स्वप्न–कांति–गतिषु । to play with dice or gamble, to desire; to overcome, to fraffic, to shine, to praise, to be glad, to be mad or drunk, to be sleepy, to wish for, to go. दीव्यति; अदीव्यत्; दीव्यतुः दीव्येयं; दीव्यासं; Pass. दीव्यते; Desid. दिदेविषति or दुद्यूषति; Deri. द्यून or द्यूत; देवितुं; देवित्वा or द्यूत्वा; दीव्यत्; देविष्यत्; दिदिवस्.

दी (दी–ङ्–Anit) 4 A. क्षये । to perish, to dacay. दाताहे; दास्यते; अदास्यत; अदास्त; अदास्थाः, दासीय; Caus. दापयति–ते; अदीदपत्–त; Desid. दिदीषते; Deri. दीन; दातव्य; दातुं; दीत्वा; प्रदाय; दिदीयान.

दीप् (दीपी–Set) 4 A. दीप्तौ । to shine, to burn, to be illustrious, Caus. Aor. अदीदिपत्–त or अदिदीपत्–त; Deri. दीप्त; दीपित्वा; दीपितुं.

दुष् (Anit) 4 P. वैकृत्ये । to be soiled, to be impure, to sin. दोष्टास्मि; दोक्ष्यति, अधोक्ष्यत्-अदुषत्; दुष्यासं; Caus. दूषयति—ते; also दोषयति—ते; to make depraved, to corrupt, Desid. दुदुक्षति; Deri. दुष्ट; दोष्टुं; दुष्ट्वा.

दू (दू-ङ्—Set) 4 A. परितापे । to suffer pain, to be sorry, to inflict pain, Caus. दावयति—ते; Deri. दून; दाव्य; or दव्य; दवितुं; दूत्वा.

दृप् (Wet) 4 P. हर्षमोहनयोः । to be glad, to be proud. ददर्प; ददर्पिथ; or ददर्प्थ or दद्रप्थ; दर्पितास्मि or दर्प्तास्मि or द्रप्तास्मि; अदृपत्; अदर्पीत्—अदार्प्सीत्; अद्राप्सीत्; Caus. Aor. अदीदृपत्-त or अददर्पत्—त, Desid. दिदर्पिषति or दिदृप्सति; Deri. दृप्त, दर्पित्वा or दृप्त्वा, दर्पितुं or दर्प्तुं or द्रप्तुं.

दो (Adit) 4 P. अवखंडने । to cut, to mow. द्यति, अद्यत्, द्यतु, देयं, Deri. दित, दित्वा, दातुं, other forms are like those of दा 1. P. to give.

द्रुह् (Wet) 4 P. जिघांसायां । to bear hatred, to seek to hurt. दुद्रोह, दुद्रोहिथ or दुद्रोग्ध or दुद्रोढ, द्रोहितास्मि, द्रोग्धास्मि, द्रोढास्मि, द्रोहिष्यति or ध्रोक्ष्यति, अद्रुहत्, Desid. दुद्रोहिषति or दुद्रुहिषति or दुध्रुक्षति, Deri. द्रुग्ध or द्रूढ, द्रोग्धव्य or द्रोढव्य or द्रोहितव्य, द्रोग्धुं or द्रोढुं or द्रोहितुं, द्रुग्ध्वा or द्रूढ्वा or द्रुहित्वा or द्रोहित्वा.

धी (धी—ङ्—Anit) 4 A. आधारे । to support, to hold, to despise. धेताहे, धेष्यते, अधेष्ट, धेषीय, Caus. धाययति–ते, Deri. धीन, धेतुं, धीत्वा.

धूर् (धूरी-Set) 4 A. हिंसागत्योः । to kill, to go, P. P. धूर्त.

नभ् (णभ्-Set) 4 P. हिंसायाम् । to kill.

नश् (णश्—Wet) 4 P. अदर्शने । to disappear, to perish, to run away, to be unsuccessful. ननाश, नेशिथ, or ननंष्ठ, नशितास्मि or नष्टास्मि, नशिष्यति or नंक्ष्यति, अनशिष्यत् or अनंक्ष्यत्, नश्यासं, Caus. नाशयति only. Desid. निनशिषति or निनंक्षति, Deri. नष्ट, नष्टुं or नशितुं, नष्ट्वा or नंष्ट्वा or नशित्वा.

नह् (णह्—Anit) 4 U. बंधने । to tie, to arm or to put on oneself (mostly A. in the last sense). नद्धास्मि—हे, नत्स्यति—ते, अनात्सीत्—अनद्ध, नह्यासं, नत्सीय, Deri. नद्ध, नद्धुं, नद्ध्वा.

नृत् (नृती—Set) 4 P. गात्रविक्षेपे । to dance, to jesticulate. नर्तितास्मि, नर्तिष्यति or नर्त्स्यति, अनर्तिष्यत् or अनर्त्स्यत्, Caus. नर्तयते only. Caus. Aor. अननर्तत, or अनीनृतत, Desid. निनर्तिषति or निनृत्सति, Deri. नृत्त, नृत्य or नर्त्य, नर्तितुं, नर्तित्वा.

पत् (पत—a Vedic root—Set) 4 A. ऐश्वर्ये । to be master of, to rule, to possess, to be fit for.

पद् (पद्–Anit) 4 A. गतौ । to go, to attain, to observe. पत्ताहे, पत्स्यते, अपत्स्यत, अपादि, अपत्सत, पत्सीय, Desid. पित्सते, Deri. पन्न, पत्त्वा, पत्तुं, प्रपद्य.

पी (पी–ङ्—Anit) 4 A. पाने । to drink. Caus. पाययति—ते.

पुथ् (Set) 4 P. हिंसायाम् । to kill.

पुष् (Anit) 4 P. पुष्टौ । to nourish, to support, to develop, to increase, to possess. पोष्टास्मि, पोक्ष्यति, अपोक्ष्यत्, अपुक्षत्, Deri. पुष्ट, पोष्टुं, पुष्ट्वा, पोष्य.

पुष्प् (Set) 4 P. विकसने । to blow, to flower.

पूर् (पूरी—Set) 4 A. आप्यायने । to fill, to satisfy, to be full, to be satisfied, Aor. अपूरिष्ट or अपूरि, Deri. पूर्ण or पूर्त.

प्री (प्री—ङ्—Anit) 4 A. प्रीतौ । to please, to be satisfied, to feel affection for. प्रेताहे, प्रेष्यते, अप्रेष्ट, Caus. प्राययति—ते.

प्लुष् (Set) 4 P. दाहे । to burn, to scorch, Desid. पुप्लुषिषति or पुप्लोषिषति, Deri. प्लोषित्वा or प्लुषित्वा.

बस् (बसु–Set) 4 P. स्तंभे । to stop.

बिस् (Set) 4 P. क्षेपे—प्रेरणेच । to throw, to instigate, to go, to split, to grow.

बुध् (बुध—Anit) 4 A. बोधने । to know, to understand, to awake, to be restored to one's senses. बोद्धाहे, भोत्स्यते, अभो

त्स्यत, अबुद्ध or अबोधि, भुत्सीय, Caus. बोधयति, अबूबुधत्, Deri. बुद्ध, बोद्धुं, बुद्ध्वा, प्रबुध्य.

बुस् (Set) 4 P. उत्सर्गे । to discharge, to emit.

व्युस् (Set) 4 P. विभागे । to divide.

भृश् (भृशु—Set) 4 P. अधःपतने । to fall down, Deri. भृष्ट, भ्रशित्वा or भृष्ट्वा, भर्शितुं.

भ्रम् (भ्रमु—Set) 4. P. अनवस्थाने । to be unsteady, to wander, to totter. भ्राम्यति, अभ्राम्यत्, भ्राम्यतु, भ्राम्येयं, Aor. अभ्रमत् Pre. P. भ्राम्यत; (other forms like those of भ्रम् 1 P.)

भ्रंश् (भ्रंशु—Set) 4 P. अधःपतने । to fall down, to decrease, to escape. भ्रश्यति, अभ्रश्यत्, भ्रश्यतु, भ्रश्येयं, अभ्रशत्, भ्रश्यासं, Deri. भ्रश्यत्, भ्रष्ट, भ्रंशित्वा or भ्रष्ट्वा, भ्रंशितुं.

मद् (मदी–घटादिः–Set) 4 P. हर्षग्लेपनयोः । to rejoice, to be poor or distressed, to be intoxicated or mad. माद्यति, अमाद्यत, माद्यतु, माद्येयं, Caus. मदयति—ते, also मादयति—ते, (to madden, to inebriate). Deri. मत्त, मदित्वा, मदितुं.

मन् (मन्—Anit) 4 A. ज्ञाने । to think, to suppose, to regard as, to esteem, to honour, to know. मंताहे, मंस्यते, अमंस्यत, अमंस्त, मंसीय, Caus. मानयति—ते, Deri. मत, मंतुं, मत्वा, मान्य.

मस् (मसी–Set) 4 P. परिमाणे । to measure, to charge for, Deri. मस्त, मासित्वा, मसितुं.

मा (मा—ङ्–Anit) 4 A. माने । to measure.

मिद् (ञि–मिदा–Set) 4 P. स्नेहने । to be greasy, to be soft, to melt, Desid. मिमिदिषति or मिमेदिषति.

मी (मी—ङ्—Anit) 4 A. हिंसायाम् प्राणवियोगेच । to die, to perish, to kill, to hurt, Caus. माययति–ते Deri. मीन, मेतुं, मित्वा.

मुष मुस् { Set } 4 P. खंडने । to destroy, to break, to steal, Desid. मुमुषिषति or मुमोषिषति; Deri. मोषित; मोषितुं; मोषित्वा or मुषित्वा.

मुह् (Wet) 4 P. वैचित्त्ये । to loose sense, to faint, to be bewildered, to err, to be foolish मुमोह; मुमोहिथ or मुमोढ or मुमोग्ध; मोहितास्मि or मोग्धास्मि or मोढास्मि; मोहिष्यति or मोक्ष्यति; अमोहिष्यत् or अमोक्ष्यत् ; अमुहत् ; मुह्यासं: Caus. मोहयति-ते but परिमोहयते only. Desid. मुमुहिषति or मुमोहिषति or मुमुक्षति; Deri. मुग्ध or मूढ; मोहितव्य or मोग्धव्य or मोढव्य; मोहितुं or मोग्धुं or मोढुं; मोहित्वा or मुहित्वा or मुग्ध्वा or मूढ्वा.

मृग् (Set) 4 P. अन्वेषणे । to seek, to hunt.

मृष् (मृष॑—Set) 4 U. तितिक्षायाम् । to bear, to endure, to suffer; to allow. Desid, मर्षित; मृषित्वा or मर्षित्वा.

यस् (यसु—Set) 4 P. प्रयत्ने । to strive, to endeavour, to labour, Caus. यासयति-ते; but आयासते only. Deri. यस्त; यसितुं; यसित्वा or यस्त्वा.

युज् (युज॒-Anit) 4 A. समाधौ चित्तवृत्तिनिरोधे । to meditate, to curb one's mind, to concentrate the mind. योक्ताहे; योक्ष्यते; अयुक्त; Caus. योजयति Deri. युक्त; योग्य or योज्य; योक्तुं; युक्त्वा.

युध् (युध॒-Anit) 4 A. संप्रहारे । to fight, to contend with. योद्धाहे; योत्स्यते; अयोत्स्यत; अयुद्ध; युत्सीय; Caus. योधयति only. Deri. युद्ध; योद्धुं; युद्ध्वा.

युप् (युपु—Set) 4 P. विमोहने । to confuse, Deri. युप्त; युपित्वा or योपित्वा or युप्त्वा; योपितुं.

रंज् (रंज॑-Anit) 4 U. रज्जति-ते; अरज्जत्—त; रज्जतु-तां; रज्येयं—य.

रध् (Wet) 4 P. हिंसा-संराद्ध्योः । to kill, to injure, to cook, to finish. ररंध; रधितास्मि or रद्धास्मि; रधिष्यति or रत्स्यति; अरधिष्यत् or अरत्स्यत् ; अरधत् ; रध्यासं; Caus. रंधयति—ते; अररंधत्-त; Desid. रिरधिषति or रिरत्सति; Deri. रद्ध; रधितुं or रद्धुं; रधित्वा or रद्ध्वा.

राध् (Anit) 4 P. वृद्धौ । to grow, to be ready, to be favourable, to look to the welfare of. राद्धास्मि; रात्स्यति; अरात्स्यत् ; अरात्सीत्; Deri. राद्ध; राद्धुं; राद्ध्वा.

रिष् (Set) 4 P. हिंसायाम् । to kill, to destroy.

री (री—ङ्–Anit) 4 A. स्रवणे । to ooze, to flow, Caus. रेपयति—ते; Deri. रीण; रेतुं; रीत्वा.

रुध् (with अनु. रुध–Anit) 4 A. कामे । to desire, to love, to comply with, to obey. रोद्धाहे; रोत्स्यते; अरुद्ध; रुत्सीय; Deri. रुद्ध; रोद्धुं.

रुप् (रुपु—Set) 4 P. विमोहने । to violate, to confound, to disturb, Desid. रुरुपिषति or रुरोपिषति; Deri. रुप्त, रुपित्वा or रोपित्वा or रुप्त्वा.

रुष् (Set) 4 P. हिंसायाम् । to kill.

लिश् (लिश–Anit) 4 A. अल्पीभावे । to decrease, to become small. लेष्टाहे; लेक्ष्यते; अलेक्ष्यत; अलिक्षत.

ली (ली–ङ्–Anit) 4 A. श्लेषणे । to adhere to, to be absorbed, to be dissolved, to hide in, to rest on, to disappear. लेताहे or लाताहे; लेष्यते or लास्यते; अलेष्यत or अलास्यत; अलेष्ट or अलास्त; लेषीय or लासीय; Caus. लाययति—ते or लापयति—ते but विलाययति—ते or विलीनयति—ते or विलापयति—ते or विलालयति-ते; Deri. लीन; लेतुं or लातुं; लीत्वा; विलाय or विलीय.

लुट् (Set) 4 P. विलोडने । to churn, to agitate, to roll, to wallow, to be connected with.

लुप् (लुपु—Set) 4 P. विमोहने । to be confused. to vanish. Desid. लुलुपिषति or लुलोपिषति; Deri. लुप्त; लोपितुं; लुप्त्वा or लुपित्वा or लोपित्वा.

लुभ् (Set) 4 P. गार्ध्ये । to covet, to long for, to allure. लोभितास्मि or लोब्धास्मि; Desid. लुलुभिषति or लुलोभिषति; Deri. लुब्ध, लोभितुं or लोब्धुं; लुब्ध्वा or लुभित्वा or लोभित्वा.

वस् (वसु—Set) 4 P. स्तंभे । to fix, to be straight, Deri. वस्त वसित्वा or वस्त्वा; वसितुं.

वावृत् (वावृतु—Set) 4 A. वरणे । to choose. Deri. वावृत्त, वावर्तित्वा or वावृत्त्वा, वावर्तितुं.

वाश् (वाशृ—Set) 4 A. शब्दे । to howl, to growl, to roar, Caus. Aor. अववाशत्—त.

विद् (विद्–Anit) 4 A. सत्तायां । to be, to exist. वेत्ताहे, वेत्स्यते, अवित्त, वित्सीय, Desid. विवित्सते, Deri. विन्न, वित्त्वा, वेत्तुं.

विस् (Set) 4 P. प्रेरणे । to send.

वुस् (Set) 4 P. विभागे । to divide.

वृत् (वृतु–Set) 4 A. वरणे । to choose, to like.

वृश् (Set) 4 P. वरणे । to choose, to like.

व्यध् (Anit) 4 P. ताडने । to strike, to hurt, to stab, to pierce, विध्यति, अविध्यत् , विध्यतु, विध्येयं, विव्याध, विव्यधिथ or विव्यद्ध, व्यद्धास्मि, व्यत्स्यति, अव्यत्स्यत् , अव्यात्सीत् , विध्यासं, Pass. विध्यते, Desid. विव्यत्सति, Deri. विद्ध, विध्द्वा.

व्युष् (Set) 4 P. विभागेदाहेच । to divide, to burn, Aor. अव्युषत् , In the last sense अव्योषीत्.

व्री (व्री–ङ्—Anit) 4 A. वरणे । to choose, P. P. व्रीण.

व्रीड् (Set) 4 P. चोदनेलज्जायांच । to throw, to be ashamed.

शक् (शकॢ—Set) 4 U. मर्षणे । to endure, to be able. शकितास्मि–हे or शक्तास्मि—हे, शकिष्यति—ते or शक्ष्यति–ते, अशकिष्यत्—त or अशक्ष्यत्–त, अशकत् , अशकिष्ट or अशक्त, शक्यासं—शकिषीय, or शक्षीय,, Desid. शिशकिषति—ते or शिक्षति–ते, Deri. शकित or शक्त, शकितुं or शक्तुं, शकित्वा or शक्त्वा, शेकिवस्–शेकान.

शप् (शप Anit) 4 U. आक्रोशे । to curse, to swear.

शम् (शमु—घटादिः–Set) 4 P. उपशमे । to be calm, शाम्यति, अशाम्यत् , शाम्यतु, शाम्येयं, Caus. शमयति-ते or शामयति-ते, (but with नि–निशामयति—ते only). Deri. शांत, शम्यं or शाम्य, शांत्वा or शमित्वा, शमितुं.

शुच् (शुचिर्—Set) 4 U. पूतिभावे (क्लेदे) । to be wet, to be clean, Aor. अशुचत् or अशोचीत्, अशोचिष्ट, Desid. शुशुचिषति—ते or शुशोचिषति—ते, Deri. शुक्त, शुचित्वा or शोचित्वा, शोचितुं.

शुध् (Anit) 4 P. शौचे । to become pure, to be made clear, शोद्धास्मि, शोत्स्यति, अशोत्स्यत, अशुधत्, शुध्यासं, Desid. शुशुत्सति, Deri. शुद्ध.

शुष् (Anit) 4 P. शोषणे । to become dry, to be withered, शोष्टास्मि, शोक्ष्यति, अशोक्ष्यत्, अशुषत्, शुष्यासं, Desid. शुशुक्षति, Deri. शुष्क, शोष्टुं, शुष्ट्वा.

शूर (शूरी—Set) 4 A. हिंसा-स्तंभनयोः । to strike, to be firm, P. P. शूर्ण.

शो (Anit) 4 P. तनूकरणे । to whet, to make thin, श्यति, अश्यत्, श्यतु, श्येयं, शशिथ or शशाथ, शातास्मि, शास्यति, अशास्यत्, अशात् or अशासीत्, शायासं, Pass. शायते, Desid. शिशासति, Deri. शित or शात, शंसित (well finished), शातुं, शात्वा or शित्वा.

श्रम (श्रमु—Set) 4 P. तपसिखेदेच । to perform acts of penance, to be fatigued, श्राम्यति, अश्राम्यत्, श्राम्यतु, श्राम्येयं, Caus. श्रमयति—ते or श्रामयति—ते, Deri. श्रांत, श्रमित्वा or श्रांत्वा, श्रमितुं.

श्लीष् (Anit) 4 P. आलिंगने । to embrace, to adhere to, to unite, श्लेष्टामि, श्लेक्ष्यति, अश्लेक्ष्यत, अश्लिषत्. In the first sense, अश्लिक्षत.

ष्ठिव् (ष्ठिवु—Set) 4 P. निरसने । to spit, ष्ठीव्यति, अष्ठीव्यत, ष्ठीव्यतु, ष्ठीव्येयं, (other forms are like those of ष्ठिव् 1 P.).

सम् (षमी—Set) 4 P. परिणामे । to change form, P. P. सांत.

सह् (षह्—Set) 4 P. तृप्तौ । to satisfy, to be pleased, साहितास्मि, सहिष्यति, असहिष्यत्, असहीत, Deri. सहित, सहितुं, सहित्वा.

सिध् (षिधु—Anit) 4 P. संराद्धौ । to be accomplished, to succeed, to be thoroughly prepared सेद्धास्मि, सेत्स्यति, असेत्स्यत्, असिधत्, Caus. साधयति—ते, also सेधयति—ते, to cause to ascertain the truth, Desid. सिषित्सति, Deri. सिद्ध, सेद्धुं, सिध्द्वा.

सिव् (षिवु-Set) 4 P. तंतुसंताने । to sew, to sow (as seed). सीव्यति, असीव्यत्, सीव्यतु, सीव्येयं, Desid. सिसेविषति or सुस्यूषति, Deri. स्यूत, सेवित्वा or स्यूत्वा, सेवितुं.

सुह् (षुह्—Set) 4 P. तृप्तौ । to be satisfied.

सू (षू-ङ्-Wet) 4 A. प्राणिगर्भविमोचने । to bring forth as a child, P. P. सून.

सृज् (सृज—Anit) 4 A. विसर्गे । to be abandoned, to drop, स्रष्टाहे, स्रक्ष्यते, असृष्ट, सृक्षीय, Caus. Aor. अससर्जत्—त or असीसृजत्—त, Desid. सिसृक्षते, Deri. सृष्ट, स्रष्टुं, सृष्ट्वा.

सो (षो-Anit) 4 P. अंतकर्मणि । to put an end to, to kill, to finish, स्यति, अस्यत्, स्यतु, स्येयं, असात् or असासीत्, सेयासं, Pass. सीयते, Caus. साययति-ते, Desid. सिषासति, Deri. सित, सातुं, सित्वा.

स्तिम् { ष्टिम }
स्तीम् { ष्टीम } (Set) 4 P. आर्द्रीभावे to become wet, to moist.

स्तूप् (ष्टूप्—Set) 4 P. समुच्छ्राये । to pile, to collect, to erect.

स्नस् (ष्णसु—Set) 4 P. निरसने । to reject, to eject, Aor. अस्नसीत् or अस्नासीत्. Caue. स्नसयति—ते or स्नासयति-ते (according to some). Deri. स्नस्त, स्नसित्वा, or स्नस्त्वा, स्नसितुं.

स्निह् (ष्णिह्—Wet) 4 P. स्नेहे । to feel affection for, to love, to be kind to, सिष्णेह, सिष्णेहिथ, or सिष्णेढ or सिष्णेग्ध, स्नेहितास्मि or स्नेढास्मि or स्नेग्धास्मि, स्नेहिष्यति or स्नेक्ष्यति, अस्निहत्, Desid. सिस्निक्षति or सिस्निहिषति or सिस्नेहिषति, Deri. स्निग्ध or स्नीढ, स्निहित्वा or स्नेहित्वा or स्निग्ध्वा or स्नीढ्वा, स्नेहितुं, स्नेढुं, or स्नेग्धुं.

स्नुस् (ष्णुसु—Set) 4 P. अदने । आदान इत्येके । अदर्शन इत्यपरे । to eat, to take, to disappear, Deri. स्नुस्त, स्नुसित्वा or स्नुस्त्वा, स्नोसितुं.

स्नुह् (ष्णुह्—Wet) 4 P. उद्गिरणे । to vomit.

स्रिव् (स्रिवु—Set) 4 P. गतिशोषणयोः । to go, to dry, स्रीव्यति, अस्रीव्यत्, स्रीव्यतु, स्रीव्येयं, Desid. सिस्रेविषति or सुस्रूषति, Deri. स्रूत स्रेवित्वा or स्रिवित्वा or स्रूत्वा, स्रेवितुं.

स्विद् (ञिष्विदा—Anit) 4 P. गात्रप्रक्षरणे । to perspire, स्वेत्तास्मि, स्वेत्स्यति, अस्वेत्स्यत्, अस्विदत् Desid. सिष्वित्सति, Deri. स्विन्न, स्वित्त्वा, स्वेत्तुं.

हृष् (Set) 4 P. तुष्टौ । to rejoice, to exult, to stand erect as hair. Caus. Aor. अजहर्षत्—त or अजीहृषत्—त, Deri. हृष्ट or हृषित, हर्षितुं, हर्षित्वा.

॥ अथ श्नु–विकरणः स्वादिगणः पञ्चमः ॥

अंश् (अंशू—Wet) 5 A. व्याप्तौसंघातेच । to pervade, to heap, to obtain, to go to, अश्नुते, अश्नुवते, आश्नुत, अश्नुतां, अश्नुवीय, आनशे, आनशिषे or आनक्षे, अशिताहे or अष्टाहे, अशिष्यते or अक्ष्यते, आशिष्यत or आक्ष्यत, आशिष्ट or आष्ट, अशिषीय or अक्षीय, Deri. अष्ट, आशितुं or अष्टुं, अशित्वा or अष्ट्वा.

अह् (a Vedic root—Set) 5 P. व्याप्तौ । to pervade, अह्नोति.

आप् (आप्लृ—Anit) 5 P. व्याप्तौ । to pervade, to obtain, to occupy, to reach, आप्नोति, आप्नुवंति, आप्नोत्, आप्नोतु, आप्नुयां, आप, आपिथ, आप्तास्मि, आप्स्यति, आप्स्यत्, आपत् Desid. ईप्सति, Deri आप्त, आप्तुं, आप्त्वा.

ऋ (a Vedic root—Anit) 5 P. हिंसायाम् । to kill, ऋणोति.

ऋक्षि (a Vedic root—Set) 5 P. हिंसायां । to kill, ऋक्षिणोति.

ऋध् (ऋधु–Set) 5 P. वृद्धौ । to increase, to prosper, to please, ऋध्नोति, आर्ध्नोत्, ऋध्नोतु, आर्धीत्, non-conjugational forms are like those of ऋध् 4 P.

क्षि (a Vedic root—Anit) हिंसायां । to kill, क्षिणोति, क्षिणुवः-क्षिण्वः, अक्षिणोत, क्षिणोतु, क्षिणुयां; non-conjugational forms are like those of क्षि 1 P.

कृ (कृं—ञ्–Anit) 5 U. हिंसायां । to kill, कृणोति—कृणुते, कृण्वंति-कृण्वते, कृणुवः-कृण्वः, अकृणोत्-अकृणुत, कृणोतु-कृणुतां, कृणु—कृणुष्व, कृणुयां—कृण्वीय, चकार—चक्रे, कर्तास्मि-हे, करिष्यति—ते, अकरिष्यत्-त, अकार्षीत्, अकृत, क्रीयासं-कृषीय, Pass. क्रीयते, Caus. कारयति—ते, Desid. चिकीर्षति-ते, Deri. कृत, कर्तुं, कृत्वा.

चम् (चमु—a Vedic root—Set) 5 P. भक्षणे ; to eat; चम्नोति.

चि (चि—ञ्—Anit) 5 U. चयने । to collect, to cover, चिनोति—चिनुते, चिनुवः-चिन्वः, चिनुवहे-चिन्वहे, अचिनवं, अचिन्वि, अचिनोत् , अचिनुत, चिनोतु, चिनुतां, चिनुयां, चिन्वीय, चेतास्मि—हे, चेष्यति—ते, अचेष्यत्—त, अचैषीत् , अचेष्ट, चीयासं, चेषीय, Pass. चीयते, Caus. चाययति—ते or चापयति—ते, Desid. चिचीषति—ते or चिकीषति—ते, Deri. चित, चेतुं, चित्वा.

चिरि
जिरि
{ Vedic roots —Set } 5 P. हिंसायाम् । to kill, चिरिणोति, जिरिणोति.

तिक्
तिग्
{ Set } 5 P. आस्कंदन—गति—वधेषु । to assail, to go, to seek, to injure or kill, to challenge, तिक्नोति, तिग्नोति.

तिघ् (Set) 5 P. हिंसायाम् । to kill, to challenge, तिघ्नोति.

तृप् (Set) 5 P. प्रीणने । to please or to be pleased, तृप्नोति, Caus. Aor. अततर्पत्—त or अतीतृपत्—त.

दघ् (a Vedic root—Set) 5 P. घातनेपालनेच । to destroy, to protect, दघ्नोति, Aor. अदघीत् or अदाघीत्.

दंभ् (दंभु—Set) 5 P. दंभने । to deceive, to injure, दभ्नोति, अदभ्नोद्, दभ्नोतु, दभ्नुयाम्, ददंभ, दंभितास्मि, दंभिष्यति, अदंभीत्, दभ्यासं. Pass. दभ्यते, Desid. धिप्सति or धीप्सति or दिदंभिषति, Deri. दब्ध, दंभितुं, दब्ध्वा, or दंभित्वा.

दाश्(a Vedic root-Set) 5 P. हिंसायां । to kill, दाश्नोति.

दु (टु-दु-Anit) 5 P. उपतापे । to give pain, to burn, to be distressed, दुनोति, दुदाव, दुदविथ-दुदोथ, दोतास्मि, दोष्यति, अदौषीत्-दूयासं, Pass. दूयते, Deri. दुत, दोतुं, दुत्वा.

दृ (a Vedic root—Anit) 5 P. हिंसायाम् to kill, दृणोति, ददार, दर्तास्मि, दरिष्यति, अदार्षीत्, द्रियासं.

धु (धुं—ञ्—Anit) 5 U. कंपने । to shake; to tremble; धुनोति; धुनुते; दुधाव; दुधुवे; धोतास्मि-हे; धोष्यति—ते; अधौषीत्-अधोष्ट; धूयासं-धोषीय; Caus. धावयति only.

धू (धू ञ्—Wet) 5 U. कंपने । to shake, to excite, to kindle, to treat roughly, धूनोति; धूनुते, धोतास्मि—हे or धवितास्मि-हे; Deri. धूत; धोतुं; धवितुं; धूत्वा.

धृष् (ञि—धृषा—Set) 5 P. प्रागल्भे । to be bold, confident, impudent or impatient; to challenge; धृष्णोति Caus. Aor. अदीधृषत्—त or अददधर्षत्—त, Deri. धर्षित or धृष्ट, धर्षितुं-धर्षित्वा.

पृ (a Vedic root—Anit) 5 P. प्रीतौ । to please, पृणोति.

मि (डु-मिं-ञ्-Anit) 5 U. प्रक्षेपणे । to throw, to scatter, Deri. मित, मित्वा, मातुं, मित्रिम (मयनेननिर्वृत्तम्).

राध् (Anit) 5 P. संसिद्धौहिंसायांच । to accomplish; to kill; to propitiate. राध्नोति.

रि (a Vedic root—Anit) 5 P. हिंसायां । to kill. रिणोति.

वृ (वृ-ञ्—Set) 5 U. वरणे । to choose; to solicit; to cover; to surround; to restrain. वरि(री)तास्मि-हे, अवारीत्, अवरि(री)ष्ट, Desid. विवरि(री)षति-ते or वुवूर्षति—ते, Deri. वृत, वरि(री)-तुं, वृत्वा.

शक् (शक्लृ—Anit) 5 P. शक्तौ । to be able; to be powerful; to bear, शक्नोति, शशाक, शेकुः शक्तास्मि, शक्ष्यति, अशकत् Desid. शिक्षति, Deri. शक्त, शक्तुं, शक्त्वा.

शि (शि-ञ्—Anit) 5 U. निशाने । to whet; to excite.

सघ् (षघ्—Set) 5 P. हिंसायां । to kill, Aor. असघीत, असाघीत्.

साध् (षाध्—Anit) 5 P. संसिद्धौ । to accomplish. साध्नोति, साद्धास्मि, सात्स्यति Desid. सिषात्सति.

सि (षिं—ञ्—Anit) 5 U. बंधने । to tie, P. P. सित, सिन (mouthful), सित्वा, सेतुं.

सु (षुं—ञ्—Anit) 5 U. स्नपन—पीडन-स्नान—सुरा—संधानेषु । to cause to bathe: to churn; to pour out; to bathe; to press out juice; to distil.

स्तिघ् (ष्टिघ—Set) 5 A. आस्कंदने । to ascend; to assail.

स्तृ (स्तृ-ञ्-Anit) 5 U. आच्छादने । to cover.

स्पृ (a Vedic root-Anit) 5 P. प्रीति—पालनयोः—प्रीतिचलनयोरित्यन्ये । to gratify, to defend, to shake.

स्मृ (a Vedic root—Anit) 5 P. चिंतायां । to remember; to recollect.

हि (Anit) 5 P. गतौ वृद्धौच । to go; to grow.

॥ अथ श–विकरणस्तुदादिगणः षष्ठः ॥

इल् (Set) 6 P. स्वप्नक्षेपणयोः । to sleep, to throw. इलति, इयेल, एलितास्मि, एलिष्यति, ऐलिष्यत्, ऐलीत्, इल्यासं, इलित, एलित्वा, एलितुं.

इष् (Set) 6 P. इच्छायाम् । to wish. इच्छति, इयेष, एषितास्मि, or एष्टास्मि Deri. इष्ट, एषितुं or एष्टुं, एषित्वा or इष्ट्वा, इच्छत्, ईषिवस्.

उज्झ् (Set) 6 P. उत्सर्गे । to abandon; to leave.

उंछ् (उच्छि–Set) 6 P. उंछे । to glean.

उब्ज् (Set) 6 P. आर्जवे । to make straight.

उभ्
उंभ् } Set } 6 P. पूरणे । to fill with.

ऋच् (Set) 6 P. स्तुतौ । to praise, ऋचति, आनर्च, अर्चितास्मि, अर्चिष्यति, आर्चिष्यत्, आर्चीत्, ऋच्यासं, Desid. अर्चिचिषति, Deri. ऋचित, अर्चितुं, अर्चित्वा.

ऋच्छ् (Set) 6 P. गतीन्द्रियप्रलयमूर्तिभावेषु । to go; to fail in faculties; to become hard or congeal; (A. with सं) ऋच्छति; (with प्र or सं प्रार्च्छति समृच्छते) आनर्छ, ऋच्छितास्मि, ऋच्छिष्यति, आर्च्छिष्यत्, आर्च्छीत्, ऋच्छ्यासं, (समृच्छिताहे, समार्च्छिष्यते, समार्च्छिष्ट, समृच्छिषीय). Pass. ऋच्छ्यते.

ऋफ् } Set } 6 P. हिंसायां । to kill.
ऋंफ् }

ऋष् (ऋषी—Set) 6 P. गतौ । to go or approach. ऋषति, (with प्र, प्रार्षति).

कड् (Set) 6 P. मदे । to be proud.

किल्ः (Set) 6 P. श्वैत्यक्रीडनयोः । to bccome white; to sport. किलति.

कु (कु-ङ्-कुटादिः—Anit) 6 A. आर्तस्वरे । to moan, कुवते, अकुवत्, कुवतां, चुकुवे, कुताहे, कुष्यते, अकुष्यत, अकुत, कुषीय, Pass. कूयते.

कुच् (कुटादिः-Set) 6 P. संकोचने । to contract; to shrink; to be crooked; (generally with सं).

कुट् (कुटादिः-Set) 6 P. कौटिल्ये । to be crooked, to bend.

कुड् (कुटादिः-Set) 6 P. बाल्येसंघातेच । to act as a child; to heap.

कुण् (Set) 6 P. शब्दोपकरणयोः । to sound; to support with gifts.

कुर् (Set) 6 P. शब्दे । to sound, कुरति, Bene. कूर्यासं.

कू (कू-ङ्-कुटादिः—Set) शब्दे । 6 A. to sound; to groan, कुवते, अकुवत, कुवतां, चुकुवे, कुविताहे, कुविष्यते, अकुविष्ट, कुविषीय, Pass. कूयते.

कृड् (Set) 6 P. दार्ढ्येभक्षणेच । to become firm; to eat.

कृड् (कुटादिः—Set) 6 P. घनत्वे । to become thick, कृडति.

कृत् (कृती—Set) 6 P. छेदने । to cut, कृंतति, अकृंतत्, कृंततु, कृंतेयं, चकर्त, कर्तितास्मि, कर्तिष्यति or कर्त्स्यति, अकर्तिष्यत or अकर्त्स्यत्. अकर्तीत्, कृत्यासं, Caus. Aor. अचीकृतत्-त, अचकर्तत्-त, Desid. चिकर्तिषति or चिकृत्सति, Deri. कृत्त, कर्तितुं, कर्तित्वा.

कृष् (कृष-Anit) 6 U. विलेखने । to draw; to plough. कृषति—ते, कर्ष्टास्मि—हे or क्रष्टास्मि—हे, कर्क्ष्यति-ते or क्रक्ष्यति-ते, अकार्क्षीत् or अक्राक्षीत्, अकृक्षत or अकृष्ट.

कॄ (Set) 6 P. विक्षेपे । to scatter; to throw; (A. with अप to scratch the ground for food or abode), किरति, अकिरत,

किरतु, चकार, करि(री)तास्मि, करि(री)ष्यति, अकरि(री)ष्यत्, अकारीत्, कीर्यासं, Pass. कीर्यते, Caus. कारयति—ते, Desid. चिकरिषति only, Deri. कीर्ण, करि(री)तुं, करि(री)त्वा.

कुडं् (कुटादिः-Set) 6 P. निमज्जनेघनिभावेच । to sink; to become thick, कुडति.

क्षि (Anit) 6 P. निवासगत्योः to dwell; to go.

क्षिप् (क्षिपं-Anit) 6 U. प्रेरणे । to throw.

क्षुर् (Set) 6 P. विलेखने । to scratch.

खिद् (Anit) 6 P. परिघाते परितापेच । to strike; to afflict; to be displeased. खिंदति, अखिंदत्, खिंदतु, चिखेद, खेत्तास्मि, खेत्स्यति, अखेत्स्यत्, अखैत्सीत्, खिद्यासं, Deri. खिन्न.

खिल् (Set) 6 P. उंछे । to glean.

खुड् (कुटादिः—Set) 6 P. संवरणे । to cover.

खुर् (Set) 6 P. छेदने । to cut.

गु (कुटादिः-Anit) 6 P. पुरीषोत्सर्गे । to void or discharge excrement. गुवति, Deri. गून.

गुज् (कुटादिः—Set) 6 P. शब्दे । to sound. गुजति.

गुड् (कुटादिः—Set) 6 P. रक्षणे । to protect. गुडति.

गुफ् }
गुंफ् } Set } 6 P. ग्रंथे । to string together.

गुर् (गुरी-कुटादिः—Set) 6 A. उद्यमने । to make an effort. Pass. गूर्यते, Desid. जुगुरिषते or जुगोरिषते. Deri. गूर्ण.

गॄ (Set) 6 P. निगरणे । to swallow, गिरति or गिलति, अगिरत्—अगिलत्, गिरतु-गिलतु, गिरेयं or गिलेयं, जगार-जगाल, गरि(री)-तास्मि—गलि(ली)तास्मि, गरि(री)ष्यति, गलि(ली)ष्यति, अगारीत्, अगालीत्, गीर्यासं, Pass. गीर्यते, Caus. गारयति-गालयति only. Deri. गीर्ण, गीर्त्वा, गरि(री)तुं, गलि(ली)तुं.

घुट }
घुड् } कुटादिः—Set } 6 P. प्रतिघाते । to strike against.

घुण् (Set) 6 P. भ्रमणे । to roll.

घुर् (Set) 6 P. भीमार्थशब्दयोः । to frighten; to sound.

घूर्ण् (Set) 6 P भ्रमणे । to roll; to whirl.

चल् (Set) 6 P. विलसने । to play; to amuse oneself.

चिल् (Set) 6 P. वसने । to dress. चिलति.

चुट् (कुटादिः—Set) 6 P. छेदने । to cut. चुटति.

चुड् (कुटादिः-Set) 6 P. संवरणे । to conceal. चुडति.

चृत् (चृती-Set) 6 P. हिसाग्रंथनयोः । to kill; to hurt; to connect together, चृंतति, अचृंतत्, चृंततु, चृंतेयं, चचर्त, चर्तितास्मि, चर्तिष्यति or चर्त्स्यति, अचर्तिष्यत् or अचर्त्स्यत्, अचर्तीत्-चृत्यासं, Caus. Aor. अचीचृतत्—त or अचचर्तत्-त, Desid. चिचर्तिषति or चिचृत्सति Deri. चृत, चर्तितुं, चर्तित्वा.

छुट् (कुटादिः—Set) 6 P. भेदने । to cut, छुटति.

छुड् (कुटादिः—Set) 6 P. संवरणे । to cover, छुडति.

छुप् (Set) 6 P. स्पर्शे । to touch, छुपति.

छुर् (कुटादिः-Set) 6 P. भेदने । to cut; to engrave; to envelop.

जर्ज् (Set) 6 P परिभाषण—हिंसा-तर्जनेषु । to say; to blame; to kill; to reprove.

जुट् (कुटादिः-Set) 6 P. बंधने । to bind, जुटति.

जुड् जुन् { Set } 6 P. गतौ । to go, जुडति, जुनति.

जुष् (जुषी—Set) 6 A प्रीतिसेवनयोः । to please; to like; to take delight in; to suffer; to enter, जुषते, Desid. जुजोषिषते or जुजुषिषते, Deri. जुष्ट, जोषितुं, जोषित्वा or जुषित्वा.

झर्झ् (Set) 6 P. परिभाषणभर्त्सनयोः । to speak; to blame; to menace.

तिल् (Set) 6 P. स्नेहे । to oil; to anoint. तिलति.

तुट् (कुटादिः-Set) 6 P. कलहकर्मणि । to quarrel; to cut, तुटति.

तुड् (कुटादिः—Set) 6 P. तोडने । to tear, to kill, तुडति.

तुण् (Set) 6 P. कौटिल्ये । to curve.

तुद् (तुदँ—Anit) 6 U. व्यथने । to wound; to strike; to pain; to vex, तोत्तास्मि-हे, तोत्स्यति-ते, अतोत्स्यत्—त, अतौत्सीत्—अतुत्त, तुद्यासं, तुत्सीय, Deri. तुन्न, तुत्वा, तोत्तुं.

तुप्-तुंप्
तुफ्-तुंफ् } Set } 6 P. हिंसायां । to kill.

तृप्-तृंप्
तृफ्-तृंफ् } Set } 6 P. प्रीणने । to please or to be pleased.

तृह { तृह्‌ } Wet 6 P. हिंसायां । to kill, तर्हितास्मि—तर्ढास्मि, तृंहितास्मि—तृंढास्मि, Caus. Aor. अततर्हत्—त, अतीतृहत्-त,
तृंह { तृंह्‌ } अततृंहत्-तँ, Deri. तृढ, तर्हित्वा, तृंहित्वा, तृढ्वा, तर्हितुं, तर्ढुं, तृंहितुं, तृंढुं.

त्रुट् (कुटादिः-Set) 6 P. छेदने । to cut; to break.

त्वच् (Set) 6 P. संवरणे । to cover.

थुड् (कुटादिः—Set) 6 P. संवरणे । to cover.

दिश् (दिँश—Anit) 6 U. अतिसर्जनेआज्ञापनेकथनेच । to give; to order; to tell; to show; to grant, देष्टास्मि-हे, देक्ष्यति-ते, आदिक्ष्यत्—त, अदिक्षत्-त, दिक्षीय, Deri. दिष्ट, दिष्ट्वा, देष्टुं.

दृ (दृ—ङ्-Anit) 6 A. आदरे । to honour; to care for; (mostly with आ), आद्रियते, आद्रियत, आद्रियतां, आद्रियेय, आदद्रे, आदर्ताहे, आदरिष्यते, आदरिष्यत, आद्रित, आद्रिषीय, Pass. आद्रियते, Caus. आदरयति-ते, आदीदरत्-त, Desid. आदिदरिषते, Deri. आदृत. आदर्तुं, आदृत्य.

दृप् (Set) 6 P. उत्क्लेशे । to give pain.

दृफ् (Set) 6 P. क्लेशे । to give pain.

दृभ् (दृभी-Set) 6 P. ग्रंथे । to string; to connect; (mostly with सं), Caus. Aor. अदीदृभत्-त or अददर्भत्—त, Deri. दृब्ध, दर्भितुं, दर्भित्वा.

तृंफ् (Set) 6 P. उत्क्लेशे । to give pain.

द्रुण् (Set) 6 P. गतिहिंसाकौटिल्येषु । to go; to kill; to make crooked.

धि (Anit) 6 P. धारणे । to hold; to possess. धेतास्मि, धेष्याति, अधेषीत्, धीयासं, Pass. धीयते.

धू (कुटादिः-Set) 6 P. विधूनने । to shake; to cause to tremble. धुवति, अधुवत्-धुवतु, धुवेयं, दुधाव, धुवितास्मि, धुविष्यति, अधुविष्यत्, अधुवीत्.

धृ (धृ—ङ्—Anit) 6 A. अवस्थाने । to be; to exist, ध्रियते, अध्रियत, ध्रियतां, ध्रियेय, दध्रे, धर्ताहे, धरिष्यते, अधरिष्यत, अधृत.

ध्रु (कुटादिः—Anit) 6 P. गतिस्थैर्ययोः । to go; to be fixed. ध्रुवति.

ध्रुव् (Set) 6 P. गतिस्थैर्ययोः । to go; to stand firm.

निल् (णिल्-Set) 6 P. गहने । to understand with difficulty; to become thick.

नुद् (णुद्—Anit) 6 U. प्रेरणे । to throw; to push; to urge on; to drive; to remove; to direct, नोत्तास्मि—हे, नोत्स्याति—ते, अनोत्स्यत्-त, अनौत्सीत्—अनुत्त, नुद्यासं-नुत्सीय, Deri. नुत्त or नुन्न, नुत्त्वा, नोत्तुं.

नुद् (णुद्—Anit) 6 P. प्रेरणे । to throw, कर्त्रभिप्रायेऽपिफले परस्मैपदार्थः पुनः पाठः (सिद्धांत कौमुदी). This root should be Parasmaipadi even when the fruit of the action refers to the agent.

नू (णू—कुटादिः—Set) 6 P. स्तुतौ । to praise, नुवति, अनुवत्, नुवतु, नुनाव, नुवितास्मि, नुविष्याति, अनुवीत्, नूयासं.

पि (Anit) 6 P. गतौ । to go.

पिश् (Set) 6 P. अवयवे—समूहस्यांशभावे-दीपनायांच । to form; to be reduced to constituent part; to light. पिंशति, अपिंशत्-पिंशतु, Pass. पिश्यते, Desid. पिपिशिषति, or पिपेशिषति, Deri. पिशित, पेशितुं, पिशित्वा or पेशित्वा.

पुट् (कुटादिः—Set) 6 P. संश्लेषणे । to embrace; to intertwine.

पुड् (कुटादिः-Set) 6 P. उत्सर्गे । to quit; to dismiss.

पुण् (Set) 6 P. शुभकर्मणि । to be pure or virtuous; to do a holy work.

पुर् (Set) 6 P. अग्रगमने । to precede; to lead.

पुल् (Set) 6 P. महत्त्वे । to be great or large.

पृ (पृ–ङ्—Anit) 6 A. (always with व्या) व्यायामेव्यापारेच । to be busy or active, व्याप्रियते, व्यापर्ताहे, व्यापृत, व्यापृषीय, Pass. व्याप्रियते, Desid. व्यापुपूर्षते.

पृड् (Set) 6 P. सुखने । to gladden.

पृण् (Set) 6 P. प्रीणने । to please; to propitiate; Caus. Aor. अपपर्णत्–त or अपीपृणत्–त.

प्रच्छ् (Anit) 6 P. ज्ञीप्सायां । to ask; to seek; to desire; to know, (A. with आ) पृच्छति–ते, अपृच्छत्–त, पृच्छतु–तां, पृच्छेयं–य, पप्रच्छ–पप्रच्छे, प्रष्टास्मि–हे, प्रक्ष्यति—ते, अप्रक्ष्यत्—त, अप्राक्षीत्—अप्रष्ट, पृच्छयासं–प्रक्षीय, Pass. पृच्छयते, Deri. पृष्ट, पृष्ट्वा, प्रष्टुं.

बिल् (Set) 6 P. भेदने । to break.

बुड् (कुटादिः–Set) 6 P. त्यागेसंवरणेच । to discharge, to cover.

बृह् (वृह्—Wet) 6 P. उद्यमने । to work, to labour. बर्हितास्मि or बर्ढास्मि, बर्हिष्यति or भर्क्ष्यति, अबर्हिष्यत् or अभर्क्ष्यत्, अबर्हीत् or अभृक्षत्, Caus. Aor. अबबर्हत् or अबीबृहत्, Desid. बिबर्हिषति or बिभृक्षति, Deri. बृढ, बर्हितुं or बर्ढुं, बर्हित्वा or बृढ्वा.

भुज् (भुजो–Anit) 6 P. कौटिल्ये । to bend, to curve, to be crooked. भोक्तास्मि, भोक्ष्यति, अभोक्ष्यत्, अभौक्षीत्, Deri. भुग्न, भोक्तुं, भुक्त्वा.

भ्रस्ज् (भ्रस्जं—Anit) 6 U. पाके । to fry, to roast, to parch. भृज्जति—ते, अभृज्जत्—त, भृज्जतु—तां, भृज्जेयं—य, बभ्रज्ज–बभर्ज, or बभ्रज्जे or बभर्जे, भ्रष्टास्मि—हे or भर्ष्टास्मि—हे, भ्रक्ष्यति—ते or भर्क्ष्यति—ते, अभ्रक्ष्यत्–त, or अभर्क्ष्यत्—त, अभ्राक्षीत् or अभार्क्षीत्–अभ्रष्ट, अभर्ष्ट, भृज्ज्यासं–भ्रक्षीय or भर्क्षीय, Pass. भृज्ज्यते, Caus. भ्रज्जयति—ते or भर्जयति–ते, Aor. अबभ्रज्जत्–त or अबभर्जत्–त, Desid. बिभ्रक्षति—ते or बिभर्क्षति–ते or बिभ्रज्जिषति–ते or बिभर्ज्जिषति—ते. Deri. भृष्ट, भ्रष्टुं or भर्ष्टुं, भृष्ट्वा.

भ्रुड् (कुटादिः-Set) 6 P. आच्छादने-संचये-निमज्जन इत्येके । to cover, to collect, to plunge.

मस्ज् (टु-मस्जो—Anit) 6 P. शुद्धौ । to sink down, to be immersed in water; to be disheartened; मज्जति; अमज्जत्; मज्जतु; मज्जेयं; ममज्ज; ममज्जिथ or ममंक्थ; मंक्तास्मि; मंक्ष्यति; अमंक्ष्यत्; अमांक्षीत्; मज्ज्यासं; Pass. मज्ज्यते; Caus. मज्जयति-ते; अममज्जत्—त; Desid. मिमंक्षति; Deri. मग्न; मंक्तुं; मंक्त्वा; मज्जथुः

मिच्छ् (Set) 6 P. उत्क्लेशे । to annoy, to hurt, to obstruct.

मिल् (मिलँ—Set) 6 U. संगमे । to be united with, to meet, to join, to clash, to happen. Desid. मिमिलिषति—ते or मिमेलिषति—ते; Deri. मिलित; मेलितुं; मिलित्वा or मेलित्वा.

मिष् (Set) 6 P. स्पर्धायां । to rival, to contend with, to look on or at.

मुच् (मुच्लृँ—Anit) 6 U. मोक्षणे । to free, to liberate, to release, to loosen, to abandon, to grant, to except, to shed, to discharge to dismiss, to utter, to void, मुंचति-ते; अमुंचत्—त, मुंचतु—तां; मुंचेयं—य; मुमोच—मुमुचे; मोक्तास्मि—हे; मोक्ष्यति—ते; अमोक्ष्यत्—त; अमुचत्—अमुक्त; मुच्यासं—मुक्षीय; Pass. मुच्यते; Desid. मुमुक्षति—ते or मोक्ष्यते; Deri. मुक्त; मोक्तुं; मुक्त्वा.

मुद् (Set) 6 P. आक्षेप-मर्दन-बंधनेषु । to blame, to crush, to bind.

मुण् (Set) 6 P. प्रतिज्ञाने । to promise.

मुर् (Set) 6 P. संवेष्टने । to surround, to bind together, Bene. मूर्यासं.

मृ (मृ-ङ्-Anit) 6 A. (but P. in all non-conjugational tenses except the Aorist and the Bene.) प्राणत्यागे । to die, म्रियते, अम्रियत, म्रियतां, म्रियेय, ममार, मर्तास्मि, मरिष्यति, अमरिष्यत्, अमृत, मृषीय, Pass. म्रियते Caus. मारयति—ते, अमीमरत्-त, Desid. मुमूर्षति Deri. मृत, मर्तुं, मृत्वा.

मृड् (Set) 6 P. सुखने । to make happy, to rejoice.

मृण् (Set) 6 P. हिंसायां । to kill.

मृश् (Anit) 6 P. आमर्शनेप्रणिधानेच । to touch, to consider, to reflect, Act. मर्ष्टास्मि or म्रष्टास्मि, मर्क्ष्यति or म्रक्ष्यति, अमर्क्ष्यत् or अम्रक्ष्यत्, अमृक्षत् or अमार्क्षीत् or अम्राक्षीत्, Caus. Aor. अमीमृशत्—त or अममर्शत्–त, Desid. मिमृक्षति, Deri मृष्ट, मर्ष्टुं or म्रष्टुं, मृष्ट्वा.

रि (Anit) 6 P. गतौ । to go, to move.

रिफ्
रिह् } Set } 6 P कत्थने कथनेवा । युद्ध–निंदा–हिंसा–दानेषु । to boast, to speak, to fight, to censure, to kill, to give.

रिश् (Anit) 6 P. हिंसायां । to kill, रेष्टास्मि, रेक्ष्यति, अरेक्ष्यत्, अरिक्षत्, Deri. रिष्ट, रेष्टुं, रिष्ट्वा.

रुज् (रुजो—Anit) 6 P. भंगे । to break, to destroy; to bend, to pain, to injure, रोक्तास्मि, रोक्ष्यति, अरोक्ष्यत, अरौक्षीत्, Deri. रुग्ण, रोक्तुं, रुक्त्वा.

रुश् (Anit) हिंसायां । to kill, रोष्टास्भि, रोक्ष्यति, अरुक्ष्यत्; Deri. रुष्ट; रुष्ट्वा; रोष्टुं.

लज् (ओलजी–Set) 6 A. व्रीडने । to be ashamed, to be bashful. Deri. लग्न; लजितुं; लजित्वा.

लस्ज् (ओलस्जी—Set) 6 A. व्रीडने । to be ashamed; to be bashful, लज्जते; अलज्जत; लज्जतां; लज्जेय; ललज्जे; लज्जिताहे; लज्जिष्यते; अलज्जिष्ट; लज्जिषीय; Pass. लज्ज्यते; Caus. लज्जयति; Desid. लिलज्जिषते; Deri. लग्न or लज्जित; लज्जितुं; लज्जित्वा.

लिख् (Set) 6 P. अक्षरविन्यासे । to write, to scratch, to draw, to touch, to peck. Desid. लिलिखिषति or लिलेखिषति; Deri. लिखित; लिखित्वा or लेखित्वा.

लिप् (लिप–Anit) 6 U. उपदेहे । to anoint, to besmear, to cover, to spread over, to stain, to pollute, लिंपति—ते; अलिंपत्—त; लिंपतु–तां, लिंपेयं–य; लिलेप–लिलिपे; लेप्तास्मि–हे; लेप्स्यति—ते; अलेप्स्यत्–त; अलिपत्—त or अलिप्त; Deri. लिप्त; लेप्तुं; लिप्त्वा.

लिश् (Anit) 6 P. गतौ । to go, to move, लेष्टास्मि, लेक्ष्यति, अलेक्ष्यत्, अलिक्षत्, Deri, लिष्ट, लेष्टुं, लिष्ट्वा.

लुट् लुठ् { कुटादिः—Set } 6 P. संश्लेषणे । to wallow, to roll about, to join.

लुप् (लुप्लृ-Anit) 6 U. छेदने । to cut, to break, to rob, to plunder, to seize, to suppress, लुंपति-ते, अलुंपत्-त, लुंपतु-तां, लुंपेयं-य, लुलोप—लुलुपे, लोप्तास्मि—हे, लोप्स्यति—ते, अलोप्स्यत्—त, अलुपत्-अलुप्त, Deri. लुप्त, लोप्तुं, लुप्त्वा.

लुभ् (Set) 6 P. विमोहने । to confound, to disturb, Deri. लुभित, लुभित्वा or लोभित्वा, लुब्ध्वा.

विच्छ्(Set) 6 P. गतौ । to go, to move, विच्छायति, अविच्छायत्, विच्छायतु , विच्छायेयं, विविच्छ or विच्छायांचकार, विच्छितास्मि or विच्छायितास्मि, विच्छिष्यति or विच्छायिष्यति, अविच्छायिष्यत् or अविच्छिष्यत्, अविच्छीत् or अविच्छायीत्, विच्छ्यासं or विच्छाय्यासं, Pass. विच्छ्यते or विच्छाय्यते, Caus. विच्छयति-ते or विच्छाययति-ते, Desid. विविच्छिषति or विविच्छायिषति, Deri. विच्छित or विच्छायित, विच्छितुं or विच्छायितुं, विच्छित्वा or विच्छायित्वा.

विज् (ओविजी—Set) 6 A. भयचलनयोः । to fear, to tremble (generally with उद्) P. P. उद्विग्न.

विद् (विद्लृ—Anit but Set according to some) 6 U. लाभे । to get, to obtain, to find, to take in marriage, विंदति-ते, अविंदत्-त, विंदतु-तां, विंदेयं—य, विवेद-विविदे, वेत्तास्मि—हे or वेदितास्मि-हे, वेत्स्यति—ते or वेदिष्यति—तें, अवेत्स्यत्—त or अवेदिष्यत्—त, अविदत्-अवित्त or अवेदिष्ट, विद्यासं-वित्सीय or वेदिषीय, Desid. विवित्सति-ते or विविदिषति-ते or विवेदिषति-ते, Deri. वित्त or विन्न, वेत्तुं or वेदितुं, विदित्वा, वित्त्वा or वेदित्वा.

विध् (Set) 6 P. विधाने । to pierce, Desid. विविधिषति or विवेधिषति.

विल् (Set) 6 P. संवरणे । to cover, to conceal.

विश् (Anit) 6 P. प्रवेशने । to enter, (A. after नि) वेष्टास्मि-हे, वेक्ष्यति—ते, अवेक्ष्यत्—त, अविक्षत्—त, Deri. विष्ट, वेष्टुं, विष्ट्वा.

वृण् (Set) 6 P. प्रीणने । to please, to gratify.

वृह (वृहु—Wet) 6 P. उद्यमने । to work, to labour, (see वृह्).

व्यच् (Set) 6 P. व्याजीकरणे ; to deceive, to defraud, विचति, अविचत्, विचतु, विचेयं, विव्याच, अव्यचीत् or अव्याचीत्.

व्रश्च् (ओव्रश्चू—Wet) 6 P. छेदने । to cut, to tear, to wound, वृश्चति, अवृश्चत्, वृश्चतु, वृश्चेयं, वव्रश्च, व्रश्चितास्मि or व्रष्टास्मि, व्रश्चिष्यति or व्रक्ष्यति, अव्रश्चिष्यत् or अव्रक्ष्यत्, अव्रश्चीत् or अव्राक्षीत्, Deri. वृक्ण, व्रश्चितुं or व्रष्टुं, व्रश्चित्वा.

व्रुड् (कुटादिः—Set) 6 P. संवरणे । to cover, to heap.

शिल् (Set) 6 P. उंछे । to glean.

शद् (शद्ऌ—Anit) 6 P. शातने । to perish gradually. (Forms are like those of शद् 1 P.)

शुन् (Set) 6 P. गतौ । to go.

शुभ् } Set } 6 P. शोभायां । to shine.
शुंभ्

सद् (षद्ऌ—Anit) 6 P. विशरणगत्यवसादनेषु । to divide, to break, to go, to wither, to despond, to be weary, (forms are like those of सद् 1. P.)

सिच् (षिचँ—Anit) 6 U. क्षरणे । to sprinkle. to moisten, to scatter, सिंचति-ते, असिंचत्—त, सिंचतु—तां, सिंचेयं—य, सिषेच—सिषिचे, सेक्तास्मि-हे, सेक्ष्यति-ते, असेक्ष्यत्—त, असिचत्—त्त or असिक्त, Deri. सिक्त, सेक्तुं, सिक्त्वा.

सिल् (षिल्-Set) 6 P. उंछे । to glean.

सुभ् (षुभ्-Set) 6 P. भाषाहिंसयोः । to speak, to kill.

सुर् (षुर्—Set) 6 P. ऐश्वर्यदीप्त्योः । to rule, to shine.

सू (षू—Set) 6 P प्रेरणे. । to impel, to drive, to discharge, to remit, सुवति, असुवत्, सुवतु, सुषाव, सवितास्मि-सविष्यति, असावीत्, Deri सूत; सवितुं; सूत्वा.

सृज् (Anit) 6 P. विसर्गे । to leave, to create, to let loose, to let off, to throw, to produce, to put on, स्रष्टास्मि; स्रक्ष्यति; अस्रक्ष्यत ; अस्राक्षीत् ; Deri. सृष्ट ; स्रष्टुं; सृष्ट्वा.

स्तृह् (ष्टृहू-Wet) 6 P. हिंसायां । to kill, to hurt, to strike, स्तर्हितास्मि or स्तर्ढास्मि; स्तर्हिष्यति or स्तर्क्ष्यति; अस्तर्हीद् or अस्तृक्षत्; Desid. तिस्तर्हिषति or तिस्तृक्षति; Deri. स्तृढ; स्तर्हितुं or स्तर्ढुं; स्तर्हित्वा or स्तृढ्वा.

स्थुड् (कुटादिः-Set) 6 P. संवरणे । to cover, to hide.

स्पृश् (Anit) 6 P. संस्पर्शने । to touch, to cling to, to act upon; to affect, to accept, to reach, to wash, स्प्रष्टास्मि or स्पर्ष्टास्मि, स्प्रक्ष्यति or स्पर्क्ष्यति; अस्प्रक्ष्यत् or अस्पर्क्ष्यत्; अस्पृक्षत् or अस्प्राक्षीत् or अस्पार्क्षीत् ; Caus. Aor. अपिस्पृशत्-त or अपस्पर्शत्-त; Desid. पिस्पृक्षति, Deri. स्पृष्ट; स्प्रष्टुं or स्पर्ष्टुं; स्पृष्ट्वा.

स्फर् (कुटादिः-Set) 6 P. संचलने । to tremble, to move.

स्फुट् (कुटादिः-Set) 6 P. विकसने । to blow, to blossom, to break.

स्फुड् (कुटादिः-Set) 6 P. संवरणे । to cover.

स्फुर् (कुटादिः-Set) 6 P. स्फुरणे । to throb, to palpitate, to become agitated, to start, to appear clearly, to flash, Caus. स्फारयति-ते or स्फोरयति-ते; Aor. अपुस्फरत्--त or अपुस्फुरत्—त.

स्फुल् (कुटादिः—Set) 6 P. संचलने । to tremble, to throb.

हल् हिल् } Set } 6 P. भावकरणे । to express amorous inclinations.

हुड् (Set) 6 P. संघाते । to collect.

॥ अथ श्नम्-विकरणो रुधादिगणः सप्तमः ॥

अंज् (अंजू—Wet) 7 P. व्यक्ति—म्रक्षण—कांति-गतिषु । to make clear, to anoint, to be beautiful, to go, अनक्ति, आनक्—ग्, अनक्तु, अंज्यां, आनंज, अंजितास्मि or अंक्तास्मि, अंजिष्यति or अंक्ष्यति, आंजिष्यत् or आंक्ष्यत्, आंजीत्, अज्यासं, Pass. अज्यते, Deri. अक्त, अंजितुं or अंक्तुं, अंजित्वा or अंक्त्वा or अक्त्वा.

इंध् (ञि—इन्धी—Set) 7 A. दीप्तौ । to shine, to kindle, इंद्धे, ऐंद्ध, इंद्धाम्, इंधीय, इंधांचक्रे, इंधिताहे, इंधिष्यते, ऐंधिष्यत, ऐंधिष्ट Pass. इध्यते, P. P. इद्ध.

उन्द् (उंदी—Set) 7 P. क्लेदने । to moisten, उनत्ति, औनत्, उनत्तु, उंद्यां, उंदांचकार, उंदितास्मि, उंदिष्यति, औंदीत्, उद्यासं. Pass. उद्यते, P. P. उत्त or उन्न.

कृत् (कृती—Set) 7 P. वेष्टने । to surround, कृणत्ति.

क्षुद् (क्षुदिर्—Anit) 7 U. संपेषणे । to pound, to crush, क्षुणत्ति—क्षुंत्ते, अक्षुणत्—अक्षुंत्त, क्षुणत्तु—क्षुंत्तां, क्षुंद्यां—क्षुंदीय, चुक्षोद-चुक्षुदे, क्षोत्तास्मि—हे, क्षोत्स्यति-ते, अक्षोत्स्यत्—त, अक्षुदत्—अक्षौत्सीत्—अक्षुत्त, Deri. क्षुण्ण, क्षोत्तुं, क्षुत्त्वा.

खिद् (खिद्-Anit) 7 A. दैन्ये । to be displeased or distressed, खिंत्ते, अखिंदि, खिंत्तां, खिंदीय.

छिद् (छिदिर्-Anit) 7 U. द्वैधीकरणे । to cut, to interrupt, to destroy, छिनत्ति—छिंत्ते, अच्छिनत्—अच्छिंत्त, छिनत्तु—छिंत्तां, छिंद्यां-छिंदीय, चिच्छेद-चिच्छिदे, छेत्तास्मि—हे, छेत्स्यति-ते, अच्छेत्स्यत्-त, अच्छिदत् or अच्छैत्सीत्—अच्छित्त, Deri. छिन्न, छेत्तुं, छित्त्वा.

छृद् (उ-छृदिर्—Set) 7 U. दीप्तिदेवनयोः । to shine, to play, छृणत्ति, छृंत्ते, छर्दिष्यति—ते or छर्त्स्यति—ते, छृद्यासं, छर्दिषीय or छृत्सीय, Caus. Aor. अचिच्छृदत् or अचच्छर्दत्-त, Desid. चिच्छर्दिषति-ते or चिच्छृत्सति—ते, Deri. छृन्न, छर्दितुं, छर्दित्वा or छृत्त्वा.

तञ्च् { तंचू—Wet } 7 P. संकोचने । to contract, to shrink, तनक्ति,
तंज् { तंजू—Wet } तंचितास्मि, तंजितास्मि, तंक्तास्मि, तच्यासं, तज्यासं, Pass. तच्यते, तज्यते, Deri. तक्त, तंजित्वा, तंचित्वा, तक्त्वा, तंक्त्वा.

तृद् (उ—तृदिर्—Set) 7 U. हिंसानादरयोः । to kill, to disregard, तृणत्ति—तृंत्ते, तर्दितास्मि-हे, तर्दिष्यति-ते, तर्त्स्यति-ते, अतर्दीत्-अतृदत्, अतर्दिष्ट, तृद्यासं-तर्दिषीय, तृत्सीय, Caus. Aor. अततर्दत्-त or अतीतृदत्—त, Desid. तितर्दिषति—ते or तितृत्सति-ते Deri. तृण्ण, तर्दितुं, तर्दित्वा or तृत्त्वा.

तृह् (Set) 7 P. हिंसायां । to kill, तृणेढि.

पिष् (पिष्लृ—Anit) 7 P. संचूर्णने । to grind, to pound, to crush. पिनष्टि, अपिनट्–ड्, पिनष्टु, पिंड्ढि, पिंश्यां, पेष्टास्मि, पेक्ष्यति, अपेक्ष्यत्, अपिषत्, Deri. पिष्ट, पेष्टुं, पिष्ट्वा.

पृच् (पृची–Set) 7 P. संपर्के । to touch, to bring into contact with, to unite, to satiate, to increase, पृणक्ति, अपृणक्, पृणक्तु, पृंच्यां, पपर्च. Deri. पृक्त, पर्चितुं, पर्चित्वा.

भंज् (भंजो—Anit) 7 P. आमर्दने । to break, to split, to interrupt, to frustrate, to disappoint, भनक्ति, अभनक्, भनक्तु, भंज्यां, बभंज, भंक्तास्मि, भंक्ष्यति, अभंक्ष्यत्, अभांक्षीत्, भज्यासं, Pass. भज्यते, Desid. बिभंक्षति, Deri. भग्न, भंक्तुं, भंक्त्वा or भक्त्वा.

भिद् (भिदिर्—Anit) 7 U. विदारणे । to break, to cut asunder, to transgress, to divide, to open, to cause to expand, to change, to perplex, to distinguish, to disturb, to betray, to set at variance, भिनत्ति-भिंत्ते, अभिनत्-अभिंत्त, भिनत्तु-भिंत्तां, भिंद्यां—भिंदीय, बिभेद—बिभिदे, भेत्तास्मि-हे, भेत्स्यति–ते, अभेत्स्यत्–त, अभिदत् or अभैत्सीत्-अभित्त, Deri. भिन्न or भित्तं (a fragment), भेत्तुं, भित्त्वा.

भुज् (Anit) 7 P. पालने । to protect, to govern, to rule, [A. अनवने । to eat, to enjoy, to endure, to pass (as time)]. भुनक्ति-भुंक्ते, अभुनक्-अभुंक्त, भुनक्तु-भुंक्तां, भुंज्यां—भुंजीय, बुभोज –बुभुजे, भोक्तास्मि–हे, भोक्ष्यति-ते, अभोक्ष्यत्—त, अभौक्षीत्—अभुक्त, Caus. भोजयति-ते, (but भोजयति only in the sense of eating), Deri. भुक्त, भोज्य or भोग्य, भोक्तुं, भुक्त्वा.

युज् (युजिर्—Anit) 7 U. योगे । to join, to unite, to apply, to use, to meditate, to concentrate the mind, to prepare, to grant, to intend, (A. after a preposition ending in a vowel), युनक्ति-युंक्ते, अयुनक्—अयुंक्त, युनक्तु—युंक्तां, युंज्यां—युंजीय, युयोज-युयुजे, योक्तास्मि—हे, योक्ष्यति—ते, अयोक्ष्यत्—त, अयुजत् or अयौक्षीत्—अयुक्त.

रिच् (रिचिँर्—Anit) 7 U. विरेचने । to purge, to empty, to evacuate, रिणक्ति-रिंक्ते, अरिणक्-अरिंक्त, रिणक्तु-रिंक्तां, रिंच्यां-रिंचीय, रिरेच—रिरिचे, रेक्तास्मि-हे, रेक्ष्यति-ते, अरेक्ष्यत्-त, अरिचत् or अरैक्षीत्-अरिक्त, Deri. रिक्त, रेक्तुं· रिक्त्वा.

रुध् (रुधिँर्-Anit) 7 U. आवरणे । to oppose, to obstruct, to besiege, to enclose, to obscure, to harass, रुणद्धि—रुंद्धे; अरुणत्-अरुंद्ध; रुणद्धु —रुंद्धां; रुंध्यां—रुंधीय; रुरोध—रुरुधे; रोद्धास्मि—हे; रोत्स्यति-ते; अरोत्स्यत्—त; अरुधत् or अरौत्सीत्—अरुद्ध; Desid. रुरुत्सति-ते; Deri. रुद्ध; रोद्धुं; रुद्ध्वा.

विच् (विचिँर्—Anit) 7 U. पृथग्भावे । to divide, to separate, to discern, to remove from, विनक्ति—विंक्ते; अविनक्-अविंक्त; विनक्तु-विंक्तां; विंच्यां-विंचीय; विवेच—विविचे; वेक्तास्मि-हे; वेक्ष्यति-ते; अवेक्ष्यत्-त; अविचत् or अवैक्षीत्—अविक्त; Desid. विविक्षति-ते; Deri. विक्त; वेक्तुं; विक्त्वा.

विज् (ओ—विजी-Set) 7 P. भय-चलनयोः । to fear, to tremble, to be disgusted, विनक्ति; अविनक्; विनक्तु; विंज्यां; विवेज; विजितास्मि; P. P. विग्न.

विद् (विद्--Anit) 7 A. विचारणे । to discuss, to reason upon, to consider, to understand, विंत्ते; अविंदत; विंत्तां; विंदीय; Deri. विन्न or वित्त; वेत्तुं; वित्त्वा; (other forms are like those of विद् 4. A.).

वृच् (वृची-Set) 7 P. वर्जने । to abandon, to exclude, वृणक्ति; P. P. वृक्त.

वृज् (वृजी-Set) 7 P. वर्जने । to avoid, P. P. वृक्त.

शिष् (शिष्लृ--Anit) 7 P. विशेषणे । to distinguish, to leave as a remainder, शिनष्टि; अशिनट्; शिनष्टु; शिंष्यां; शिशेष; शेष्टास्मि; शेक्ष्यति; अशेक्ष्यत्; अशिषत्; Desid. शिशिक्षति; Deri. शिष्ट; शेष्टुं; शिष्ट्वा.

हिंस् (हिसि-Set) 7 P. हिंसायाम् । to kill, हिनस्ति; अहिनत्; हिनस्तु; हिंस्यां; जिहिंस; Pass. हिंस्यते.

॥ अथ उ–विकरणस्तनादिगणोऽष्टमः ॥

ऋण् (ऋणुँ—Set) 8 U. गतौ । to go, ऋणोति-ऋणुते or *अर्णोति; अर्णुते; आर्णोत्—आर्णुत; ऋणोतु—ऋणुतां or अर्णोतु—अर्णुतां; ऋणुयां-ऋण्वीय or अर्णुयां—अर्णुवीय; आनर्ण—आनृणे; अर्णितास्मि—हे; अर्णिष्यति—ते; आर्णीत्-आर्णिष्ट or आर्त; ऋण्यासं-अर्णिषीय; Pass. ऋण्यते; Caus. अर्णयति-ते; Desid. अर्णिनिषति—ते; Deri· ऋत; अर्णितुं; अर्णित्वा or ऋत्वा.

कृ (डु—कृँ—ञ्-Anit) 8 U. करणे । to do, to make, करोति—कुरुते; अकरोत्—अकुरुत; करोतु-कुरुतां; कुर्यां-कुर्वीय; चकार—चक्रे; कर्तास्मि-हे; करिष्यति-ते; अकरिष्यत्-त; अकार्षीत्-अकृत; क्रियासं-कृषीय; Pass क्रियते; Caus. कारयति-ते; Aor. अचीकरत्-त; Desid. चिकीर्षति—ते; Deri. कृत; कर्तुं; कृत्वा.

